६. F^1 et F^2 remplacent 51cd-52ab par : द्विदण्डं वेदिकोत्सेधं भजेत्योत्सेधकोस्ततः (F^1 : कोत्ततः)। तत्कर्णात्त्रिभिरंशैः स्यातेकेनाधरपट्टिका (F^1 : एकोपरिपट्टिका)॥

७. 51c वेदिकोत्सेधं] A, D, वेदिरुत्सेधा C, वेदिरुत्सेधं G ; 51d तदुत्सेधं] A, D, G, उत्सेधं च C.

८. Lacune générale d'un demi-vers au moins entre 51cd et 52ab (nombre de parties incomplet).

९. 52a द्वियंशं कण्ठम्] C, D^2, G, द्वयंशं कन्तुम् (?) A^1, द्वयंशं कर्णम् A^2, द्वियंशकं खण्डम् D^1 ; 52b एकेनाधारपट्टिका] A, D, एकेन परिपट्टिका C^1, एकेनोपरिपत्तिका C^2, G.

१०. F^1 et F^2 omettent 52cd-54ab.

११. C^1 : lacune 53b-56a.

१२. 53b ग्रीवविस्तरम्] (*v.f.*) A^2, D, G, च विस्तरम् A^1, सविस्तरम् C^2.

१३. 54c प्रस्तराष्ट॰] Eds., प्रासादाष्ट॰ C^2, D, F, प्रासादार्ध॰ A, G.

[1]वेदितारं त्रिभागं च द्विभागं गलविस्तरम्[2] ।
वेदिविस्तारतुल्यं च शिखरविस्तारमत्र वै[3] ॥ ५५ ॥
शिखरतारं त्रिभागैकं महानासीति विस्तृतम्[4] ।

[६.९. स्तूपिकालक्षणम्]

शिखरात्पञ्चभागं च त्रिभागं पालिविस्तरम्[5] ॥ ५६ ॥
[6]पालिविस्तरपञ्चांशत्रिभागं पद्मविस्तृतम्[7] ।
[8]पद्मतारं त्रिभागैकं कुम्भतारमिति स्मृतम्[9] ॥ ५७ ॥
[10]कुम्भतारत्रिभागैकं लग्नकण्ठं तथैव च[11] ।
लग्नकण्ठं त्रिभागं स्यात्पाल्याकारस्य विस्तृतम्[12] ॥ ५८ ॥
पाल्याकारस्य विस्तारं त्रिभागं मुकुलोच्छ्रयम्[13] ।
[14]स्तूपिकोत्सेधमानं तु द्वात्रिंशतिविभाजितम्[15] ॥ ५९ ॥
सप्तांशं पद्मकोत्सेधमध्यर्धस्कन्धमुच्यते[16] ।

---

१. F^1 et F^2 remplacent 55ab par : वेदिं तद्यतुरं भागं त्रिभागं गलविस्तृतम्।

२. 55b विस्तरम्] A, विस्तृतम् C, D, G.

३. 55c च] A(etc.), स्यात् F ; 55d °विस्तारमत्र वै] A, lacune C^2, °मत्र वै कल्पयेत् D^1, °मत्र वै ++ D^2, °स्य तु विस्तरम् F^1, °स्य तु विस्तृतं F^2, ++ वै G.

४. 56a शिखरतारं त्रिभागैकं] (*v.f.*) D, शिखरं तारभोगैकं A^1, शिखान्तारत्रिभागैकं A^2, शिरोभावं त्रिभागैकं C^2, शिखरं तत्र भागैकं F, शिखरभागत्रिभागैकं G ; 56b °नासीति विस्तृतम्] D, G, °रासिति विस्तरम् A^1, °रासीति विस्तरम् A^2, °नासेति विस्तृतम् C^2, °नासं च विस्तृतम् F^1, °नां च वितिविस्तृतम् F^2.

५. 56d पालिविस्तरम्] A, D^1, G, बलविस्तृतम् C, बलिकविस्तृतम् F^1, lacune F^2.

६. A, C^1 omettent 57ab ; F^2 omet 57ab-58cd.

७. 57a पालिविस्तर°] D, G, शिल्यविस्तार° C^2, बलिकविस्तारा° F^1 ; 57d पद्मविस्तृतम्] C^2, पत्रविस्तृतम् D, G, पद्मविस्तारम् F^1.

८. F^1 omet 57cd-58cd.

९. 57c पद्मतारं] C^2, D^1, G, पद्मं तार° A.

१०. C^1 omet 58ab-58cd.

११. 58b °कण्ठं] A^2, C^2, D, G, °कर्णं A^1.

१२. 58d पाल्याकारस्य विस्तृतम्] A, D, G, पाल्या +++ विस्तृतम् C^2.

१३. 59b त्रिभागं मुकुलोच्छ्रयम्] A, C, D, G, त्रिभागेकं मुलोच्छ्रयम् F.

१४. C^1 : lacune de 59d-62a ; F^1 omet 59cd-62ab.

१५. 59c स्तूपि°] C, D, F^2, G, स्थूपि° A ; 59d द्वात्रिंशति°] A, F^2, द्वाविंशति° C, D, G.

१६. 60b °स्कन्ध°] C^2, D, G, °स्कन्द° A, F^2.

[1]अध्यर्धाधरपद्मं तु सप्तांशं तद्घटोच्छ्रयः[2] ॥ ६० ॥
अध्यर्धमूर्ध्वपद्मं तु षडंशं ग्रीवमुच्यते[3] ।
अर्धांशं पालिवृत्तं च विलग्नं चैकभागिकम्[4] ॥ ६१ ॥
मुकुलोच्छ्रयं षडंशं स्तूपिमानमुदाहृतम्[5] ।

[७. एकतलप्रासादभेदाः]

[७.१. श्रीकरम्]

अधिष्ठानस्तम्भयुक्तं प्रस्तरग्रीवसंयुतम्[6] ॥ ६२ ॥
शिखरस्तूपिकायुक्तं महानासिचतुष्टयम्[7] ।
द्विदण्डं च द्विदण्डार्धं कपोतनासिविस्तरम्[8] ॥ ६३ ॥
[9]कपोतनासिकाष्टौ च मण्डपे पादनासिका[10] ।
अनिष्क्रमं शिरोवृत्तमाकारं चतुरश्रकम्(?)[11] ॥ ६४ ॥
[12]एभिस्तु लक्षणैर्युक्तं श्रीकरं तत्प्रशस्यते[13] ।

---

१. D^1 omet 60cd-61ab.

२. 60c अध्यर्धाधरपद्मं] A^2, C^2, D^2, G, अध्यर्धतारपद्मं A^1, अध्यर्धारपट्टं स्यात् F ; 60d °च्छ्रयः] A^1(etc.), °च्छ्रयं A^2.

३. 61a ऊर्ध्व°] C^2, F, G, आर्ध्व° A^1, आध्व° A^2, आर्ध D^2 ; 61b षडंशं ग्रीवमुच्यते] Eds., षडध्वं ग्रीवमुच्यते A, षडर्धं ग्रीवमुच्यते C^2, D^2, G, षट्त्रिंशद्ग्रीवमुच्छ्रयम् (?) F^1, षडंशं ग्रीवमुच्छ्रयम् F^2.

४. 61c पालिवृत्तं] Eds., पङ्क्तिवृत्तं A, C, D, G, कम्पनीव्रं F.

५. 62a मुकुलोच्छ्रयं षडंशं] F, मुकुलात्पद्मभागार्धं A^1, फेलोच्चं पद्मभागार्धं C^2, मुकुलोच्चं पद्मभागार्धं A^2, D^2, मुकुलोच्चं पद्मभागान्तं D^1, lacune G.

६. 62d संयुतम्] C^2, संयुक्तम् A, C^1, D, F.

७. 63a स्तूपि°] A^2, C, D, F, G, स्थूपि° A^1 ; 63b °नासि°] A, D, lacune C^1, °नास° C^2, °नास्यां F, °नाडी° G.

८. 63d कपोतनासि°] Eds., कपोता स्याच् A^1, कपोतनास्याश्च A^2, F^2, G, कपोतं स्याच् C, कपोतस्य च D^1, कपोरनस्यां च D^2, कपोतानां स्वविस्तृतम् F^1.

९. Tous les manuscrits sauf F intercalent les vers 64ab-88cd dans le chapitre 7.

१०. 64a कपोत°] F, त्रिभागं A^1(etc.).

११. 64c अनिष्क्रमं शिरोवृत्तं] A, C, अनिष्कं(?) शिरोवृत्तं D^1, अनिष्कमं शिरोवृत्तं D^2, कनिष्टं शिखरोयुक्तं F^1, अनिष्टमं शिरोयुक्तं F^2, अविष्कम्भशिरोवृत्तं G ; 64d °माकारं] C, D, G, °मकारं A, वृत्तं वा F.

१२. C^2 omet 65b-65c.

१३. 65b श्रीकरं तत्प्रशस्यते] C^1, D, G, शिखरं तत्प्रशस्यते A, श्रीकरं तत्प्रकीर्तितम् F.

[७.२. श्रीविशालम्]

तलालङ्कारकं प्रोक्तं कर्णकूटं चतुस्त्रिकम्[१] ॥ ६५ ॥
[२]विस्तारस्य त्रिभागैकं मध्यमे निर्गमं भवेत्।
श्रीविशालमिदं प्रोक्तं प्रासादानां विशेषतः[३] ॥ ६६ ॥

[७.३. श्रीभोगम्]

[४]तदलङ्कारमत्र स्याद्वेदिकाष्टाश्रसंयुतम्[५] ।
अष्टपञ्जरसंयुक्तं श्रीभोगं नामनामतः ॥ ६७ ॥

[७.४. स्वस्तिबन्धनम्]

तदलङ्कारमत्र स्यात्सायतं चतुरश्रकम्[६] ।
पञ्जराभिर्विहीनं स्यात्स्तूपित्रयसमायुतम्॥ ६८ ॥
एतत्प्रासादनामा हि स्वस्तिबन्धनमुत्तमम्।

[७.५. पर्वतम्]

तदलङ्कारकं प्रोक्तं शिखरं चतुरश्रकम्[७] ॥ ६९ ॥
वेदिकावृत्तमेवं स्यान्महानासिकोष्ठसंयुतम्[८] ।
[९]पर्वतं नाम एवं स्यादथ तेन विहीनकम्॥ ७० ॥

[७.६. सर्वतोमुखम्(?)]

तदलङ्कारमेवोक्तं वेदिका चतुरश्रका[१०] ।
ग्रीवं शिखरमष्टाश्रं महानास्यष्टमेव च[११] ॥ ७१ ॥

---

१. 65c तलालङ्कारकं प्रोक्तं] A^1, तवालङ्करणं प्रोक्तम् A^2, तदेवालङ्कारमेवोक्तं (*v.f.*) C^1, D, G, तदेव अलङ्कारमन्त्रोक्तं F ; 65d कर्णकूटं चतुस्त्रिकम्] A^1, अश्रकूटं चतस्त्रिकम् A^2, कर्णकूटं चतश्रकम् C^1, D, G, कण्ठकूटं चतुस्त्रिकम् C^2, कर्णकूटं च तन्त्रकल् F.

२. D : lacune 66a-88b.

३. 66d प्रासादानां विशेषतः] A^2, C, G, प्रासादानां तु शेषतः A^1, सर्वदेवार्हणं विदुः F.

४. 67ab-69ab ne se trouvent que dans F^1 et F^2.

५. 67a तदलङ्कारमत्र] Eds., तदेवालङ्कारमन्त्र A(etc.).

६. 68a तदलङ्कारमत्र स्यात्] Eds., तदेवालङ्कारमन्त्रं स्यास्ति A(etc.).

७. 69c तदलङ्कारकं प्रोक्तं] Eds., देवालङ्कारकं प्रोक्तं A, lacune C^1, तदेवालङ्कारमेवोक्तं (*v.f.*) G, तदेवालङ्कारमेवं स्यात् F.

८. 70b महानासिकोष्ठसंयुतम्] (*v.f.*) A(etc.) , महानासा च कोष्ठयुक् C^2.

९. A^1 et A^2 omettent 70d-73a ; F^1 et F^2 remplacent 70cd par : प्रासादो पर्वतो नाम आयतेन विहीनकम् ।

१०. 71a तदलङ्कारमेवोक्तं] C^2, तदेवालङ्कारमेवोक्तं C^1, G, तदेवालङ्कारमित्यादि F ; 71b चतुरश्रका] F, चतुराश्रिता C^2, °यतरश्रता C^1, °यताश्रिता G.

११. 71c शिखरमष्टाश्रं] C^2(etc.), सिखरस्यान्महा° F ; 71d महानास्यष्टमेव च] G, महानाद्य अष्टमेव च C^1, महानाद्यष्टमं च वा C^2, नास्याञ्चाष्टभिर्युतम् F.

एभिस्तु लक्षणैर्युक्तं सर्वतोमुखमुच्यते[१] ।

[७.७. आयतादिप्रासादाः]

तदलङ्कारमेवोक्तमायतं वृत्तमेव च[२] ॥ ७२ ॥
कर्णकूटविहीनं स्याद्ग्रीवं वृत्तायतं भवेत्[३] ।

[७.८. हस्तिपृष्ठम्]

द्व्यश्रवृत्तं ततः कुर्यात्प्राङ्मुखो नासिका भवेत्[४] ॥ ७३ ॥
पूर्वे ललाटसंयुक्तं गोपुरास्याकृतिर्भवेत्[५] ।
[६]पार्श्वे पृष्ठे च संयुक्तं शिखराकृतिरेव च[७] ॥ ७४ ॥
महानासीत्रिभिर्युक्तं हस्तिपृष्ठमिहोच्यते[८] ।

[८. नागरादिप्रासादजातयः]

जातित्रयं विधातव्यं प्रासादानां विशेषतः ॥ ७५ ॥
[९]नागरं द्राविडं चैव वेसरं च त्रिधा मतम्[१०] ।
उपानात्स्तूपिपर्यन्तं युगाश्रं नागरं भवेत्[११] ॥ ७६ ॥

---

१. 72a तु लक्षणैर्युक्तं] C^2(etc.), लक्षणसंयुक्तं F ; 72b सर्वतो] F^1, परितो C^2(etc.), पर्वतो F^2.

२. 72c तदलङ्कारमेवोक्तं] C^2, तदेवालङ्कारमेवोक्तं C^1, G, तदेवालङ्कारमेवं स्यात् F ; 72d आयतं] C^2(etc.), इत्यातं F.

३. 73b वृत्तायतं] C, F, G, वृत्तायनं A.

४. 73c द्व्यश्र°] A, G, द्व्यश्रं C ; 73d नासिका भवेत्] C^2, नासिका महत् A, G, लघुने C^1, मुखनासिका F.

५. 74b गोपुरास्याकृतिर्] Eds., गोपुरस्याकृतिर् A^1(etc.).

६. F^1 et F^2 remplacent 74cd-75ab par : तत्प्रसार्धत्रिपुष्टिं हि पार्श्वं पृष्ठमेव हि। तिसृभिर्महानासिसंयुक्तं हस्तिपृष्ठकम्॥ ; G intercale entre 74ab et 74cd un demi vers composé de 74c et 74b.

७. 74c पृष्ठे च संयुक्तं] A, पृष्ठद्विसंयुक्तं C, G ; 74d शिखराकृतिर्] A^2, C, G, शिखरं तु त्रिर् A^1.

८. 75a °नासी त्रिभिर्] C^1, °नासीस्त्रिभिर् A, °नासिकया C^2, °नासी तिसृभिर् G.

९. C^2 intercale 75cd et 76ab : प्रासादं द्राविडं चैव ह्यष्टाश्रं वा विशेषतः।

१०. 76a नागरं] A, प्रासादं C, G ; 76b वेसरं च त्रिधा मतम्] A, वेसरं च त्रिधा भवेत् C, G, सौरं च त्रिविधा स्मृतं F.

११. 76c उपानात्स्तूपि°] C, उपानादिस्तुपर्य° A^1, उपानादिस्तूपि° A^2, होमादिस्थूपि° F, उपानास्तूपि° G ; 76d युगाश्रं नागरं भवेत्] A, चतुरश्रं नागरं भवेत् C^1, चतुरश्रं तु नागरम् C^2, नागरं चतुरश्रकम् F.

[1]चतुरश्रायतं चैव अष्टाश्रं वा विशेषतः[2] ।
प्रासादं द्राविडं विद्याद्वेसरं चाथ वक्ष्यते॥ ७७ ॥
वृत्तं वृत्तायतं चैव द्व्यश्रवृत्तं तथैव च[3] ।
[4]प्रासादं वेसरं विद्यात्त्रिविधं तत्प्रशस्यते[5] ॥ ७८ ॥

[९. तोरणानि]

प्रासादपार्श्वे पृष्ठे च तोरणानि प्रकल्पयेत्[6] ।
पादायामाष्टपञ्चांशं स्तम्भदैर्घ्यं प्रकीर्तितम्[7] ॥ ७९ ॥

[१०. लिङ्गात्प्रासादविस्तारः]

[8]त्रिभागं च त्रिधा कृत्वा एकांशं लिङ्गविस्तरम्[9] ।
लिङ्गविष्कम्भमानेन त्रिगुणं पीठविस्तरम्[10] ॥ ८० ॥
पीठस्य त्रिगुणं गर्भं बाह्ये भित्त्येकभागिकम्[11] ।
पीठाच्चतुर्गुणं वापि गर्भगेहं विधीयते[12] ॥ ८१ ॥
गर्भगेहार्धकं वापि पीठतारसमोऽपि तत्[13] ।
तत्पीठतारद्विगुणं भित्तिविष्कम्भमुच्यते[14] ॥ ८२ ॥

---

१. C^1 omet 77ab ; F^1 et F^2 remplacent 77ab-77cd par : चतुरश्राष्टायश्रं प्रासादद्रविडं भवेत्।

२. 77b वा] A, C, च G.

३. 78b तथैव च] A^1(etc.), तु वेसरं F.

४. F^1 et F^2 omettent 78cd.

५. 78d प्रशस्यते] A, प्रचक्षते C, G.

६. 79a °पार्श्वे पृष्ठे च] C^2, G, °पार्श्वतः पृष्ठे A^1, °पूर्वपृष्ठे च A^2, lacune C^1, °पार्श्वपृष्ठे च F ; 79b तोरणानि] A^1(etc.), तोरणादीन् F^1.

७. 79c पादायामाष्ट°] A, C^1, G, प्रासादायामाष्ट° C^2, पादाष्टभागात् F.

८. F^1 et F^2 omettent 80ab mais intercalent entre 79cd et 80cd :

अष्टादशं त्रिभागैकं सर्वलक्षणसंयुतम्। सप्तभागं चतुर्भागं गर्भगेहस्तु विस्तृतम्॥
परितो भित्तिमानं स्यात्शेषभागैर्विशेषतः। + हारारं (?) त्रिधा भज्य भागैकं पीठविस्तरम्॥
पीथतारान्तं त्रिधा भज्य लिङ्गतारं तथांशकम्।

९. 80a त्रिभागं च त्रिधा] A, त्रिभागमत्रिधा C^2, त्रिभागमन्त्रध C^1, त्रिभागं मन्त्र्या G.

१०. 80d त्रिगुणं पीठ°] F, न समं पीठ° A, समं पीठं स° C, समपीठस्य G.

११. 81b भित्त्येक°] C^1, F^2, G, भित्वैक° A^1, भित्येक° A^2, C^2, भक्तेक° F^1.

१२. 81d विधीयते] A^1(etc.), इति स्मृतम् F.

१३. 82b °तारसमोऽपि तत्] A, °तारसमं च वा C^2, lacune C^1.

१४. 82c तत्पीठतार°] A^1(etc.), पीठतारस्य F ; 82d °मुच्यते] A(etc.), °माहरेत् F^1.

[११. गर्भस्थानम्]

[1]गर्भस्थान +++++++ स्तम्भमुच्यते।
कवाटार्गलयोगे वा स्तम्भमूले विधीयते[2] ॥ ८३ ॥

[१२. नाललक्षणम्]

उपानं जगतीं चैव कुमुदं कण्ठपट्टिका[3] ।
तत्तलास्थ्याविधिं (?) ह्येते ऊर्ध्वाधच्छिद्रमिष्यते[4] ॥ ८४ ॥
सोमस्थाने जलस्राव +++++ नालकम्[5] ।
उपानौ जगत्यां वापि कण्ठे नालं न कारयेत्[6] ॥ ८५ ॥
केवलं जलमार्गं स्याद्वृतौ नालं प्रकल्पयेत्[7] ।
हस्तायतत्रिपादो वा वितस्तिर्वा विशेषतः[8] ॥ ८६ ॥
नालायाममिदं प्रोक्तं विस्तारं द्वादशाङ्गुलम्।
दशाङ्गुलाष्टाङ्गुलं वा नालविस्तारमुच्यते[9] ॥ ८७ ॥
[10]विस्तारस्य त्रिभागैकं नालाग्रे तु विहीनकम्[11] ।
[12]चतुस्त्रिद्व्यङ्गुलं वापि ऊर्ध्वे खातं प्रकल्पयेत्[13] ॥ ८८ ॥

---

१. A, C, G : lacune 83ab ; C et G intercalent un quart de vers entre 83b et 83d : द्वारस्थापनस्य दक्षिणे (G: द्वारस्थान) ; F^1 et F^2 omettent 83ab-83cd.

२. 83d स्तम्भमूले] Eds. (cf. 4.97), स्तम्भमूलं A^1(etc.).

३. 84b कण्ठपट्टिका] C^2, F^1, स्कन्दपट्टिका A^1, G, स्कन्दपट्टिकम् A^2, कर्ण° C^1, F^2.

४. 84c तत्तलास्थ्या विधिं ह्येते] A^1, G, lacune A^2, तत्तन्धरस्यावधिं C^1, तत्स्कन्धस्य विधिर्ह्येतद् C^2, तत्तालस्य विधिं ह्येते F.

५. 85b +++++ नालकम्] A, C, G, वि बाह्ये तु ++++ F^2, पि बाह्ये रतुना + कम् F^1.

६. 85c जगत्यां] Eds., जगता A, lacune C, जगतीं F, G ; 85d कण्ठे] C, F, G, कर्णे A.

७. 86a lacune C^1 ; 86b वृतौ] A^1(etc.), वृत्त F^1.

८. 86c हस्तायत°] Eds. हस्तयाम° A^1, हस्तं वा तत् A^2, C^1, F, G, हस्तं वाथ C^2.

९. 87d नालविस्तारमुच्यते] A, C^1, G, वितस्तिर्वा विशेषतः C^2.

१०. C^2 omet 88ab-88cd.

११. 88a विस्तारस्य त्रिभागैकं] A^1(etc.), नाला त्रिभागैकं F ; 88b नालाग्रे तु विहीनकम्] C^1, F, नाल एव तु हीनकम् A, G.

१२. F^1 et F^2 remplacent 88cd par :

शिल्पिनं पूजयेद्वस्त्रैः हेमाङ्गुलिसमायुतैः। नालं प्रकल्पयेच्छिल्पं सुमुहूर्ते सुलग्नके॥
वारुणं सूक्तमुच्चार्य वामस्थो मन्त्रविग्रहः।

१३. 88c चतुस्त्रिद्व्यङ्गुलं वापि] A^2, C^1, G, चतुस्त्रि + + लं वा + A^1 ; 88d ऊर्ध्वे खातं] A^1, मध्ये ख्यातं A^2, बलघातं C^1, मध्ये वेदं G.

[१३. दिशामूर्तयः]

[1]प्रासादपार्श्वे पृष्ठे च दिशामूर्तिं तु विन्यसेत्[2] ।
सेनापतिर्भवेत्पूर्वे दक्षिणामूर्तिर्दक्षिणे॥ ८९ ॥
पश्चिमे नारसिंहस्तु उत्तरे च पितामहः।
[3]तन्मण्डपस्य पार्श्वे तु विघ्नमूर्तिं प्रकल्पयेत्॥ ९० ॥
सौम्ये कात्यायनीं कुर्यान्महिषस्य शिरःस्थिताम्।

[१४. द्वारलक्षणम्]

[4]वृतेरुत्तरसीमान्तं द्वारोत्सेधमिति स्मृतम्॥ ९१ ॥
[5]तदर्धं चैव बहुलं सर्वप्रासादयोग्यकम्[6] ।
द्वारे उत्तरबन्धं च द्वारबन्धमिति स्मृतम्[7] ॥ ९२ ॥
द्वारबन्धस्य तत्पूर्वे लिङ्गस्थापनमारभेत्[8] ।
स्थाप्य द्वारोत्तरं पश्चात् सर्वसंपत्करायच[9] ॥ ९३ ॥
आभिचारेण कुर्यात्तु राजराष्ट्रविनाशनम्[10] ।
[11]एकभूमिरिदं प्रोक्तं द्वितलं च ततः शृणु॥ ९४ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे एकतलप्रासादपटलः [षष्ठः] समाप्तः[12]॥

---

१. C^1 : lacune 89a-89c.

२. 89a °पार्श्वे पृष्ठे च] A, C^2, D, G, °स्य चतुर्दिक्षु F.

३. F^1 et F^2 omettent 90cd-91ab.

४. 6.91cd-6.92ab très semblables à 7.58ab-58cd.

५. F^1 et F^2 remplacent 92ab par : बहुल्यं स्यात्तदर्धेन सर्वप्रासादकर्मणि।

६. 92a बहुलं] A, G, बहले C^2, च भलं D.

७. 92c द्वारे] A, C, D, G, द्वारैर् F ; च] A^1, यत् F.

८. 93a °बन्धस्य] A, C^1, D, G, °बाह्येषु C^2 ; 93b : lacune F^2.

९. 93d सर्व°] A, C^1, D, G, द्वारा° C^2.

१०. 94a आभिचारेण कुर्यात्तु] A, C^1, D, अन्यथा चैव कर्तव्यं F^1, अन्यथा नैव कर्तव्यं F^2.

११. Dans G, 94cd, le colophon et le début du chapitre suivant sont intercalés dans le chapitre 10.

१२. A^2, D : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे एकतलप्रासादपटलः सप्तमः ; C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे प्रासादविधिः पटलः ; C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे प्रासादविधिः षष्ठः पटलः ; F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां एकभूमिविधिः सप्तमपटलः ; F^2 : इति दीप्तशास्त्रे एकभूमिविधिः सप्तमः पटलः ; G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे प्रासादलक्षणविधिः षष्ठमपटलः।

[सप्तमः पटलः]
[द्वितलप्रासादविधिः][१]

[२]अथातः संप्रवक्ष्यामि द्वितलं पञ्चमानकम्[३] ।

[१. द्वितलप्रासादहस्तमानम्]

पञ्चसप्तनवरुद्रत्रयोदशकरैरपि[४] ॥ १ ॥

हस्तसंख्या भवेत्तत्र द्वितलस्य विशेषतः[५] ।
विस्तारद्विगुणोत्सेधं सर्वेषां तु विधीयते ॥ २ ॥

[२. स्वस्तिकम्]

[२.१. मानम्]

पञ्चहस्तप्रविस्तारं षड्भागेन विभाजयेत्।
एकांशं कूटविस्तारं शालायामं द्विधं भवेत्[६] ॥ ३ ॥
[७]एकांशहारसंयुक्तं हारपञ्चरशोभितम्[८] ।
[९]अग्रतो मण्डपं कुर्यात्प्रासादसमविस्तरम्॥ ४ ॥
[१०]प्रासादद्विगुणं वाथ अर्धत्रिपादमेव वा।

[२.२. विमानोत्सेधः]

विमानोत्सेधं विभजेदष्टाविंशतिसंख्यया[११] ॥ ५ ॥
[१२]त्रिभागाभिरधिष्ठानं षड्भागं पाददैर्घ्यकम्[१३] ।

---

१. Manuscrits utilisés: A^1, A^2, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. Dans G, les vers 1a-21a et la fin du chapitre précédent sont intercalés dans le chapitre 10.

३. 1a अथातः संप्रवक्ष्यामि] A, C^2, D, G, lacune C^1, अतः परं प्रवक्ष्यामि F ; 1b मानकम्] A, C, D, G, F^1, नामकम् F^2.

४. 1cd पञ्चसप्तनवरुद्रत्रयोदशकरैरपि] F, पञ्चहस्तं नवाहस्तमेकादशं त्रयोदशम् A, C, D, G.

५. 2a हस्तसंख्या भवेत्तत्र] A, C, D, G, प्रासादान्तरमाख्यातं F^1, प्रासादं तारमाख्यातं F^2.

६. 3d °यामं द्विधं] F^1, °यामद्वयं A, C, D, G, F^2.

७. 7.4cd = 6.18ab et 7.16ab.

८. 4a °हारसंयुक्तं] A, C, D, G, °हारया युक्तं F.

९. F^1 omet 4d-5cd.

१०. F^2 omet 5ab.

११. 5d अष्टाविंशतिसंख्यया] A, C, D, G, त्वष्टविंशति भागय F^2.

१२. Nous suivons les manuscrits F, les seuls à placer ici les vers 6ab-20cd qui, dans les autres manuscrits, sont dans le chapitre 6 ; dans C^1 le passage 6ab-8ab est lacunaire et peu utilisable.

१३. 6a त्रिभागाभिरधिष्ठानं] F^2, द्विदण्डकमधिष्ठानं A, D, द्विदण्डर्(?)आयिमानं C^2, lacune

त्रिभागैः प्रस्तरं कुर्यादादिभूमौ विशेषतः ॥ ६ ॥
पञ्चभागोर्ध्वपादं स्याद् द्विभागं प्रस्तरं भवेत्[१] ।
वेदिकाभागमेवं स्याद्द्विभागं ग्रीवमुच्यते[२] ॥ ७ ॥
चतुर्भागोर्ध्वमुत्सेधं शिखरं कारयेद्बुधः[३] ।
शेषं स्थूपिरिति ख्यातमेवं द्वितलमानकम्॥ ८ ॥

[२.३. विविधलक्षणम्]

चतुरश्रमधिष्ठानं चतुरश्रं शिखरं भवेत्[४] ।
[५]चतुष्कूटसमायुक्तं चतुश्शालासमायुतम्[६] ॥ ९ ॥
[७]पञ्चरैरष्टभिर्युक्तं महानासीचतुर्युतम्[८] ।
प्रस्तरं नासिकायुक्तं षड्विंशतिकसङ्ख्यकम्[९] ॥ १० ॥
[१०]मण्डपाग्रे विशेषेण अनुनासीं प्रकल्पयेत्[११] ।
ऊर्ध्वे भूमिं चतुर्भित्तिं सर्वालङ्कारसंयुतम्[१२] ॥ ११ ॥
पूर्वोक्तैः पादविस्तारैः पादालङ्कारमुच्यते[१३] ।

G ; 6b षड्भागं पाद॰] F^2, D, G, षट्पादं पाद॰ A^1, पादं पादस्य A^2.

१. 7a पञ्चभगोर्ध्वपादं स्याद्] A, पञ्चपादोर्ध्वपादं स्याद् C^2, D, G, ऊर्द्धपादं तु पञ्चांशं F ; 7b प्रस्तरं भवेत्] A, C^2, D, G, प्रस्तरोन्नतम् F.

२. 7c एवं] A, D, F, G, एकं C^2.

३. 8a भागोर्ध्वम्] A, C^2, D, G, भागार्धम् F ; 8b शिखरं कारयेद्बुधः] A, C^2, D, G, शिरस्य विधीयते F^1, शिखरस्य विधीयते F^2.

४. 9a चतुरश्रमधिष्ठानं] A, समं चतुरविस्तारं C, G, समं चतुरश्रं अधिष्ठानं D, F ; 9b चतुरश्रं शिखरं] (*v.f.*) D, F^1, G, चतुरश्शिखरं A^1, चतुरश्रं शि + C^1, चतुरश्रं शिखा C^2, चतुरश्रं शिरं F^2.

५. A^1 omet 9cd-10cd ; A^2 place 11ab avant 9cd.

६. 9c : lacune C^1 ; 9d चतुश्शालासमायुतम्] D^1, F, चतुस्तालसमायुतम् A^2, D^2, G, चतुस्तालसमन्वितम् C.

७. 10ab-12ab lacunaire et peu utilisable dans C^1.

८. 10b महानासीचतुर्युतम्] C^2, महानासं चतश्रकम् A^2, G, महानासं चतस्तकम् D, चत्वरोमहानासिकः F^1, चत्वरोमहानासिका F^2.

९. 10d विंशतिक॰] A^2, C^2, D, G, विंशतिभि(र्) F^1, विंशति हि F^2.

१०. A^1 remplace 11ab par : नासिकाष्टौ च मण्डपे पादनासी प्रकल्पयेत्।

११. 11b अनुनासीं] A^2, C^2, D, G, भद्रासीनं F^1, क्षुद्रासीनं F^2.

१२. 11c ऊर्ध्वे भूमिं चतुर्भित्तिं] A^2, C^2, D, F, G, ऊर्ध्वभूमिचतुर्वृत्त॰ A^1.

१३. 12b उच्यते] A, C^2, D, G, आरभेत् F.

एतद्वै स्वस्तिकं नाम सर्वदेवेषु योग्यकम्[१] ॥ १२ ॥

[३. कैलासम्]

[३.१. विस्तारः]

सप्तहस्तं तु विस्तारं षड्भिर्भागैर्विभाजयेत्[२] ।
भागैकं कूटविस्तारं शालायामं द्विभागिकम्॥ १३ ॥
[३]भागैकं हारसंयुक्तं हारपञ्जरशोभितम्[४] ।
चतुरश्रमधिष्ठानं शालानिर्गममेव च[५] ॥ १४ ॥
दण्डं वाथ द्विदण्डं वा त्रिदण्डं कोष्ठनिर्गमम्[६] ।

[३.२. मण्डपमन्तरालं च]

मण्डपं समसूत्रं स्यादन्तरालं तु निम्नकम्[७] ॥ १५ ॥
[८]अग्रतो मण्डपं कुर्यात्प्रासादसमविस्तरम्[९] ।
[१०]तदर्धं वा त्रिपादं वा मण्डपस्य तु विस्तरम्॥ १६ ॥
द्विदण्डं वा त्रिदण्डं वा अन्तरालस्य निर्गमम्[११] ।
एकहस्तं द्विहस्तं वा प्रासादं भागमेव वा॥ १७ ॥
अन्तरालस्य विस्तारं मध्ये कुम्भलतायुतम्[१२] ।

[३.३. तोरणं कूटादि च]

शालामध्ये तु कर्तव्यं तोरणं लक्षणान्वितम्[१३] ॥ १८ ॥

---

१. 12d °देवेषु योग्यकम्] A, C^2, D, G, °देवार्हणं विदुः F.

२. 13b षड्भिर्भागैर्विभाजयेत्] A, D, G, lacune C^1, षड्भागैकं विभाजयेत् C^2, षड्भागैर्विभजेद्बुधः F.

३. C^1 : très lacunaire et inutilisable de 14ab à 15cd ; F^2 omet 14ab-15cd.

४. 14b हारपञ्जर°] A, D^1, G, हारपद्मादि° C^2, हारपद्मेन D^2.

५. 14c चतुरश्रमधिष्ठानं] A, समञ्चतुराधिष्ठानं C^2, D, G.

६. 15a वाथ] A, D^1, G, वापि C^2, वा D^2 ; 15b त्रिदण्डं] Eds., दण्डं वा A, C^2, D^1, G, त्रिदण्डं वा (*v.f.*) D^2.

७. 15c मण्डपं समसूत्रं] A^1(etc.), दण्डसमसूत्रं F^1.

८. 7.16ab = 6.18ab et 7.4cd.

९. 16b प्रासादसमविस्तरम्] C^2, F, G, तत्प्रासादस्य विस्तृतम् A, D^1, प्रासादसविस्तृतम् C^1, D^2.

१०. F^1 et F^2 remplacent 16cd par : अर्धं वापि त्रिपादं वा मण्डपस्य विशालतः।

११. 17b निर्गमम्] A^1(etc.), निम्नकम् F^1, निर्गति F^2.

१२. 18a अन्तरालस्य] A^1(etc.), अन्तराल° F ; 18b °युतम्] A, पुनः C^2, D, G.

१३. 18c °मध्ये] A^2, C, D, F, G, °मूर्ध्वे A^1.

[1]वृतेरुत्तरसीमान्तं तोरणस्योच्छ्रयं भवेत्।
[2]त्रिदण्डं वा त्रिदण्डार्धं चतुर्दण्डं सविस्तरम्[3] ॥ १९ ॥
[4]पादायामं नवांशं स्यात्षड्भागं पाददैर्घ्यकम्[5] ।
त्रिभागं मकरांशं स्यात्पत्रपातं विशेषतः[6] ॥ २० ॥
[7]कर्णे कर्णे तु कूटं स्यान्मध्ये मध्ये तु कोष्ठकम्।
हारान्तराणां तन्मध्ये पञ्जरोपरि कल्पितः[8] ॥ २१ ॥
चतस्रश्शाला नास्यश्च कूटं चत्वारि एव च[9] ।

[३.४. विमानोत्सेधः]

विमानोत्सेधं विभजेच्चतुस्त्रिंशतिभागभाक्॥ २२ ॥
त्र्यंशमर्धमधिष्ठानं सप्तांशं स्तम्भदैर्घ्यकम्[10] ।
त्रिभागैः प्रस्तरं कुर्यादूर्ध्वपादं षडंशकैः॥ २३ ॥
प्रागिव प्रस्तरं कुर्याद्वेदिका भागमेव च[11] ।
ग्रीवोत्सेधं द्विभागार्धं शिखरं पञ्चभागिकम्॥ २४ ॥
शेषं स्थूपिरिति ख्यातमेतद्वितलमानकम्।

[३.५. विविधलक्षणम्]

ऊर्ध्वभूमिं चतुर्भित्तिमध्ये दण्डविनिर्गतम्॥ २५ ॥
वेदिकाष्टाश्रसंयुक्ता शिखरोऽष्टाश्रमिष्यते ।
ग्रीवमष्टाश्रसंयुक्तं महानास्यष्ट एव च॥ २६ ॥

---

१. 7.19ab = 8.16cd

२. Nous suivons l'ordre des manuscrits D^1, F^2, et G ; A^1 place 20cd avant 19cd ; C^2 et D^2 placent 19cd avant 20cd ; F^1 omet 19cd.

३. 19c त्रिदण्डं वा त्रिदण्डार्धं] A, C^2, D, G, द्विदण्डं वा त्रिदण्डं वा F^2 ; 19d सविस्तरम्] A, C^2, D, G, वाथ विस्मृतम् (*v.f.*) F^2.

४. C^2 omet 20ab ; F^1 et F^2 remplacent 20ab-20cd par : पादायामं ग्रहांशेन विभज्येत्तु विशेषतः। षड्भागैः पाददैर्घ्यं स्यात्त्रिभागैर्मकरांशकम्॥ सिंहव्यालगजैर्वापि मकरैर्वापि पूजितम् (pour भूषितम्?) ।

५. 20b षड्भागं] A, D, G, षट्पादं C^1.

६. 20c त्रिभागं मकारांशं स्यात्] C^2, D, G, त्रिभागमेकरांशस्या A ; 20d पत्रपातं विशेषतः] Eds., lacune A, C^2, D, पत्रपातं विशेषतः G.

७. Tous les manuscrits sauf F^1 et F^2 omettent les vers 21ab-43cd.

८. 21d पञ्जरोपरि कल्पितः] F^2, पञ्जरोऽपि परिकल्पिता F^1.

९. 22a चतस्रश्शाला नास्यश्च] Eds., शतस्रशाला नास्यां च F ; 22b चत्वारि एव च] F^2, चारिमेव च F^1.

१०. 23a त्र्यंशं] Eds., त्र्यंशाद् F.

११. 24a प्रागिव] Eds., प्रागिभि F^1, भागिभिः F^2.

महानास्याश्च विस्तारं त्रिदण्डं तावदुच्छ्रयम्[१] ।
प्रस्तरं नासिकायुक्तं चत्वारिंशत्सलक्षणम्॥ २७ ॥

[३.६. कूटाद्याकृतिः]

ऊर्ध्वपादोन्नतं यावत्पञ्चभागैर्विभाजयेत्।
भागैकं वेदिकोत्सेधं भागं ग्रीवमुदाहृतम्॥ २८ ॥
द्विभागं शिखरं तस्मिन्नेकांशा स्थूपिका स्मृता।
एतद्वै कूटशालानां मानं सर्वत्र लक्षितम्॥ २९ ॥
अष्टाश्रं चतुरश्रं वा कूटानामाकृतिर्भवेत्।
गोपुरस्याकृतिं ध्यात्वा कोष्ठाकाराकृतिस्तथा॥ ३० ॥
एभिस्तु लक्षणैर्युक्तं कैलासं तत्प्रकीर्तितम्।

[४. निषदम्]

[४.१. मानम्]

नवहस्तं विस्तरं स्यात्सप्तभागैर्विभाजयेत्[२] ॥ ३१ ॥
चत्वारि भागमाधिक्यमायतं चतुरश्रकम्।
अधिष्ठानसमं सूत्रमन्तरालं सुनिम्नकम्[३] ॥ ३२ ॥
ऊर्ध्वं तु भूमिं विभज्यात्पञ्चभागैर्विचक्षणः।
विमानोत्सेधं विभजेत्त्रयस्त्रिंशतिरंशकैः[४] ॥ ३३ ॥
त्रिभागार्धैरधिष्ठानं सप्तांशैः पाददैर्घ्यकम्।
त्रिभागैः प्रस्तरं कुर्यादूर्ध्वपादं षडर्धकम्[५] ॥ ३४ ॥
प्रस्तरोच्चद्विभागाभ्यां वेदिका भागमेव च।
तद्ग्रीवोच्चं द्विभागार्धं शिखरं पञ्चभागिकम्॥ ३५ ॥
शेषं स्थूपिरिति ख्यातमेतद्वितलमानकम्।

[४.२. विविधलक्षणम्]

मध्यमे तोरणयुक्तं षोडशैः पञ्जरैर्युतम्॥ ३६ ॥
प्रस्तरं नासिकायुक्तं षोडशं च द्वयाधिकम्।
चतुरश्रायतं ग्रीवं शिखरं तावदेव तु॥ ३७ ॥
स्थूपित्रयसमायुक्तं कूटशालाविहीनकम्[६] ।
पादं सर्वाङ्गसंयुक्तं महानास्याश्चतस्रकः॥ ३८ ॥

---

१. 27a महानास्याः च] Eds., महानास्योच्च° F.

२. 31c °हस्तं विस्तरं स्यात्] Eds., °हस्तस्य द्विहस्तं (*v.f.*) F.

३. 32d सुनिम्नकम्] F^1, सुनिर्गमम् F^2.

४. 33c विमानोत्सेधं] Eds., विहीनोत्सेधं F.

५. 34a त्रिभागैः] F^2, भागैकं F^1.

६. 38a स्थूपित्रय°] Eds., स्थूपियन्त्र° F.

एभिस्तु लक्षणैर्युक्तं विमानं निषदं स्मृतम्[१] ।

[५. भद्रकोष्ठम्]

[५.१. विस्तारः]

रुद्रहस्तप्रविस्तारं सप्तभागैर्विभाजितम्[२] ॥ ३९ ॥
एकांशकूटविस्तारं शालायामं त्रिभागभाक्।
शालामध्ये तु निष्क्रमं द्विदण्डेनैव कारयेत्॥ ४० ॥
भागैकं हारसंयुक्तं हारमध्ये द्विनासिका[३] ।
पञ्चभागस्तदूर्ध्वे तु पञ्चराभिस्तु तारयुक्॥ ४१ ॥

[५.२. उन्मानम्]

प्रासादस्योच्छ्रयं यावत्षट्त्रिंशद्भागया भजेत्।
चत्वारि कुट्टिमोत्सेधमष्टांशं पाददैर्घ्यकम्[४] ॥ ४२ ॥

[५][Lacune]

प्रस्तरं स्यात्त्रिभागाभिर्भागैकं वेदिकोन्नतम्।
ग्रीवोत्सेधं त्रिभागाभिः षड्भिर्वै शिखरं स्मृतम्॥ ४३ ॥
[६]शेषांशैः स्थूपिकां कुर्यात्सर्वसंपत्कराय च।

[५.३. विविधलक्षणम्]

मण्डलं कर्णकूटं स्याच्छिखरं वर्तुलं भवेत्[७] ॥ ४४ ॥
वेदिकाग्रीवौ वृत्तौ तु महानासिचतुष्टयम्[८] ।
[९]प्रस्तरं नासिकायुक्तं चत्वारिंशच्च संयुतम्[१०] ॥ ४५ ॥

---

१. 38d निषदं] F^2, नवध F^1.

२. 39d भागै°] Eds., हारै° F.

३. 41a हारसंयुक्तं] F^1, भात्रयुक्तं वा F^2 ; 41b द्विनासिका] F^1, विनासिका F^2.

४. 42d अष्टांशं] Eds., अष्टाश्रं A^1, F^1.

५. Lacune générale (entablement du 1er palier et niveau des piliers du 2nd).

६. A, C^2, D et G donnent cette version de 44ab : शेषभागैः शिखां कुर्यादेवमेवं विशेषतः।

७. 44c मण्डलं] Eds., मण्डपं A(etc.).

८. 45a ग्रीवौ वृत्तौ तु] F, ग्रीवमुक्तं तु A, lacune C^1, ग्रीववृत्तं वा C^2, शिववृत्तं तु G ; 45b महानासिचतुष्टयम्] F, महानास्यां चतुष्टयम् A, C^1, महानास्यां च सम्युतम् C^2.

९. C^2 omet 45cd ; F^1 omet 45d-49a.

१०. 45d च संयुतम्] A(etc.), द्वयाधिकम् F^2.

[1]मण्डपं तु त्रिधा भज्य मध्ये तोरणसंयुतम्[2] ।
मण्डपस्य तु यत्पादं तत्पादोपरि नासिका॥ ४६ ॥
शालामध्ये महानासी भद्रमेवं प्रकीर्तितम्[3] ।
[4]एकयोन्या कृतं पादमष्टाश्रं पादविस्तृतम्[5] ॥ ४७ ॥
तोरणस्तम्भवेदाश्रं सर्वालंकारसंयुतम्[6] ।
एभिश्च लक्षणैर्युक्तं भद्रकोष्ठमिति स्मृतम्॥ ४८ ॥

[६. पञ्चालम्]

[६.१. विस्तारः]

प्रासादस्य तु विस्तारं त्रयोदशकरैर्मितम्[7] ।
विस्तारं सप्तधा कृत्वा भागं स्यात्कर्णकूटकम्[8] ॥ ४९ ॥
[9]शालायामं तथैवं स्यादर्धांशं पञ्जरं भवेत्[10] ।
ऊर्ध्वभूमिस्तु कर्तव्या पञ्चभागैर्विशेषतः॥ ५० ॥
पञ्जरं कूटकोष्ठं च समसूत्रं निम्नहारकम्[11] ।
अन्तरालं तु निम्नं स्यान्मण्डपं समसूत्रकम्॥ ५१ ॥
शालोन्नतं तु कर्तव्यं कूटनिम्नं तु कारयेत्।
चतुष्कोष्ठाष्टकूटं स्यात्पञ्जरं विंशतिर्भवेत्[12] ॥ ५२ ॥

---

१. F^2 omet 46cd et remplace 46ab par : त्रिपन्ति(pour त्रिभक्ति ?)मण्डपं तस्य मध्ये तोरणभूषितम्।

२. 46a भज्य मध्ये] Eds., भित्तिर्मध्ये A, G, भक्तिमध्ये C.

३. 47b भद्र॰] A, F^2, G, तत्र॰ C^1, तत॰ C^2.

४. F^1 omet 47cd-48cd.

५. 47c एकयोन्या कृतं] G, एकैर्येनाकृतं A^1, एकैर्योन्याकृतं A^2, एकैर्योग्याकृतिम् C, D ; 47d अष्टाश्रं] A(etc.), अष्टाग्रं D ; विस्तृतम्] A, G, वृत्तकम् C, D.

६. 48a ॰वेदाश्रं] C, D, G, ॰वेदाग्रं A.

७. 49b त्रयोदशकरैर्मितम्] F^2, हस्तदेहत्रयोदश A, G, हस्ते देहस्त्रयोदश C, D, त्रयोदशकरैर्मतम् F^1.

८. 49d भागं स्यात्कर्ण॰] A, D, भागं स्यत्कण्ठ॰ C, G, भागैकं कर्ण॰ F.

९. F^1 et F^2 remplacent 50ab-50cd par : शालायामं द्विभागाभ्यां मध्यजं पञ्जरं भवेत्। भागाभिः पञ्जरैर्युक्तं तस्योर्ध्वे भूमिर्विशेषतः॥

१०. 50b अर्धांशं] A, D, G, lacune C^1, अर्धकं C^2.

११. 51b समसूत्रं] D, F, मसूरं A^1, मयूर A^2, lacune C^1, स सूत्रं C^2, मसूर G ; निम्नहारकम्] A, C, D, G, निम्नभारतः F.

१२. 52c चतुष्कोष्ठाष्टकूटं स्यात्] C^2, D, F, G, चतुष्कोष्ठाष्टकं कूटं A, एकाष्टाष्टकूटं स्यात् C^1.

[६.२. उन्मानम्]

विमानोत्सेधं विभजेच्चत्वारिंशत्सुभागिकम्[१] ।
तुर्यांशं कुट्टिमोत्सेधमष्टांशं स्तम्भमुच्यते[२] ॥ ५३ ॥
[३]चतुर्भागं चोर्ध्वमन्नं सप्तांशं तूर्ध्वपादकम्[४] ।
[५]त्रिभागं मन्नमुत्सेधं द्विभागं वेदिकोच्छ्रयम्[६] ॥ ५४ ॥
त्रिभागं ग्रीवमुत्सेधं शिखरं सप्तभागिकम्[७] ।
शेषं स्थूपिरिति ख्यातमेतद्वितलमानकम्॥ ५५ ॥

[६.३. विविधलक्षणम्]

अष्टाश्रं शिखराकारं ग्रीवमष्टाश्रमिष्यते।
[८]महानास्यष्टभिर्युक्तमनासिप्रस्तरैर्युतम्[९] ॥ ५६ ॥
चत्वारिंशच्च नासी च अनासीप्रस्तरान्वितम् (?)[१०] ।
[११]मण्डपस्य तु मध्यमे नासिका परिकीर्तिता (?)[१२] ॥ ५७ ॥

---

१. 53a विभजेत्] A^1, F, G, lacune A^2, C^2 ; 53b चत्वरिंशत्सुभागिकम्] A(etc.), चत्वरिंशति सङ्ख्यया F.

२. 53c तुर्यांशं कुट्टिमोत्सेध°] F, अर्धांशं कूटमुत्सेध° A^1, तुर्यांशं कूटमुत्सेध° A^2, G, कुर्याच्च कुट्टिमोत्सेध° C^1, D^1, कुर्याच्च मण्डपोत्सेध° C^2 ; 53d °मुच्यते] A, °मुत्तमम् C, D, °दैर्घ्यकम् F.

३. F^1 et F^2 remplacent 54ab par : प्रस्तरस्य चतुर्भागं सप्तांशं चोर्ध्वभागिकम्।

४. 54a °भागं चोर्ध्वमन्नं] C^1, °भागं चोर्ध्वं च स्यात् A, D, G, °भागोर्ध्वमन्त्री स्यात् C^2 ; 54b °पादकम्] Eds., °भागिकम् A, C, D, G.

५. C^2 omet 54cd-55ab ; F^1 omet 54cd.

६. 54c मन्नम् उत्सेधं] A, D^1, त्वस्योत्सेधं C^1, D^2 , पन्नसोत्सेधं F^2 ; 54d द्विभागं A^2, C^1, D, F^2, G, + भागं A^1.

७. 55a ग्रीवमुत्सेधं] A, C^1, D, G, श्रीवत्सोत्सेधं F^1, ग्रीवस्योत्सेधं F^2 ; 55b सप्तभागिकम्] A, D, G, lacune C^1, तस्य भागभाक् F.

८. C^1 omet 56d-57a ; F^1 et F^2 remplacent 56d par 59b, et intercalent ensuite 59cd-60ab (répétés à nouveau à leur place normale).

९. 56d °मनासिप्रस्तरैर्] A^1, °मनुनासीप्रसुरैर् (*v.f.*) A^2, न नासाप्रस्तरैर् (*v.f.*) C^2, G, °मन्नासिप्रस्तरैर् (*v.f.*) D^1, °मननासिप्रस्तरैर् (*v.f.*) D^2.

१०. 57ab च अनासि प्रस्तरान्वितम्] A^1, अनुनासी प्रस्तरान्वितम् A^2, C^1, D, G, चानुनासी प्रस्तरान्वितम् C^2, अनुनासिभिरलङ्कृतम् F.

११. F^1 et F^2 remplacent 57cd par : अष्टग्रीवसुनासा च कपोतस्य प्रकीर्तिताः।

१२. 57c मध्यमे] Eds., तद्वामे A, C^1, D, G, मद्वामे C^2 ; 57d परिकीर्तिता] C, D, G, परिकीर्तितम् A^1, नासकीर्तितम् A^2.

[६.४. द्वारलक्षणम्]

[१]वृतेरुत्तरसीमान्तं द्वारोत्सेधं विधीयते[२] ।
[३]तदर्धं विस्तरं चैव सर्वद्वारस्य लक्षणम्॥ ५८ ॥
वृतेरुत्तरसीमान्तं मण्डपद्वारमिष्यते।
अर्धं वापि त्रिपादं वा द्वारोत्सेधसमं च वा[४] ॥ ५९ ॥
मण्डपद्वारविस्तारं कारयेद्वेधकर्मणि[५] ।

[६.५. पुनर्विविधलक्षणम्]

[६]कूटविस्तारमष्टांशं कारयेत्तु विचक्षणः[७] ॥ ६० ॥
द्विभागं नासिविस्तारं शालायामं तथैव च[८] ।
एतत्पञ्चालनामा हि सर्वदेवेषु योग्यकम्[९] ॥ ६१ ॥

॥ इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे द्वितलप्रासादपटलः [सप्तमः] समाप्तः[१०] ॥

---

१. 7.58 très proche de 6.91cd-92ab ; 7.59ab = 11.12cd ; 7.59cd très proche de 11.13ab ; 7.60a = 11.13c.

२. 58b विधीयते] A, C^1, D, G, इति स्मृतं F.

३. F^1 et F^2 remplacent 58cd par : तदर्धं विस्तृतं तस्य सर्वधार्हणं विदुः।

४. 59c अर्धं वापि त्रिपादं वा] A(etc.), अर्धपादद्विपादं वा F ; 59d समं च वा] C^2, समोऽपि वा A, C^1, D^1, F, समापि वा G.

५. 60b कारयेद्वेधकर्मणि] A^1, G, कारयेद्वाऽथ कर्मणि C, D^2, साधयेद्वाध कर्मणि D^1, एवमेवं विधीयते F^1, lacune F^2.

६. Lacune probable avant 60cd (à moins que 60cd-61ab ne soient pas à leur place).

७. 60d कारयेत्] A^1, D^1, F, G, द्वारयेत् C, D^2 ; विचक्षणः] A, C, D, G, विशेषतः F.

८. 61a द्विभागं नासिविस्तारं] A, C, D, G, द्विहर्धनासिकामानं F^1, द्विभागार्धं नासिकातारं (?) F^2.

९. 61c पञ्चालनामा हि] D, F, पञ्चरनामं तु A^1, G, lacune A^2, पञ्चालमानं तु C ; 61d सर्वदेवेषु योग्यकम्] A(etc.), प्रशस्तं सर्वधामनि F ; F^1 et F^2 ajoutent ce demi-vers avant le colophon : द्वितलं च इति प्रोक्तं त्रितलं च ततः शृणु।

१०. A^2, D : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे द्वितलप्रासादोऽष्टमः ; C : इति दीप्तशास्त्रे महातन्त्रे द्वितलप्रासादविधिः सप्तमः पटलः ; F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां द्वितलप्रासादपटलाष्टमः ; F^2 : इति दीप्तशास्त्रे प्रतिष्ठायां द्वितलप्रासादपटलः षष्ठाः ; G इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे द्वितलप्रासादोऽष्टमः पटलः।

[अष्टमः पटलः]
[त्रितलप्रासादविधिः][१]

[१. त्रितलप्रासादमानम्]

अथातः संप्रवक्ष्यामि पञ्चमानं त्रिभूमिकम्[२] ।
विस्तारोत्सेधमधुना एकैकं वक्ष्यते क्रमात्[३] ॥ १ ॥
विस्तारं सप्तहस्तं स्यादुच्छ्रयं द्विगुणं भवेत्[४] ।
विस्तारं नवहस्तं स्यादुत्सेधं द्विगुणं भवेत्[५] ॥ २ ॥
एकादशकरे तारे सप्तदशसमुच्छ्रयः[६] ।
विंशद्धस्तोच्छ्रयं हर्म्यं विस्तारं तु त्रयोदशम्[७] ॥ ३ ॥
पञ्चदशकरे हर्म्ये उच्छ्रयं चैकविंशतिः[८] ।
एवं पञ्चविधं प्रोक्तं विस्तरोच्चं विशेषतः[९] ॥ ४ ॥

[२. भद्रललितम्]

[२.१. विस्तारः]

सप्तहस्तं भवेत्तारं सप्तभागेन भाजयेत्[१०] ।
एकांशं कूटविस्तारं शालायामं द्विभागिकम्॥ ५ ॥
अध्यर्धं हारविस्तारं हारपञ्जरशोभितम्[११] ।
[१२]पञ्चभागोर्ध्वभूमिस्तु ऊर्ध्वभूमित्रिभागिकम्[१३] ॥ ६ ॥

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. 1a अथातः संप्रवक्ष्यामि] A(etc.), अथ वक्ष्ये विशेषेण D^1.

३. 1d क्रमात्] C, D, F, ऽधुना A, G.

४. 2b उच्छ्रयं] A^2, G, उच्छ्रायाद् A^1, विच्छ्रेयं C, विज्ञेयं D, विछ्रं F^1, विच्छ्रयं F^2.

५. 2d द्विगुणं भवेत्] A, C, D, G, षोडशां करम् F.

६. 3a °करे तारे] C, D, G, °करो तरे A ; 3b सप्तदश] C, D, G, सप्तादश A .

७. 3c विंशद्धस्तोच्छ्रयं हर्म्यं] A^1, D, F^2, G, lacune A^2, F^1, विंशाच्छ्रेयार्थं तल्छ्रेयं C.

८. 4a करे हर्म्ये] A^2, F, G, करो हर्म्ये A^1, कहर्म्ये च C^2, D.

९. 4d विस्तरोच्चं विशेषतः] A, C^1, D, विस्तरोर्ध्वं विशेषतः C^2, विस्तारायाममुच्यते F, विस्तारोऽयं विशेषतः G.

१०. 5a भाजयेत्] A, F^2, G, भावयेत् C, D, F^1.

११. 6a अध्यर्धं] A, C^1, D, F^2, G, अर्धार्धं C^2.

१२. F^1 omet 6cd.

१३. 6d ऊर्ध्वभूमित्रि°] A^1, तदूर्ध्वे भूमित्रि° A^2, C^1, D^2, तदूर्ध्वे भूत्रि° C^2, तदूर्ध्वभूमि° D^1, F^2, G.

[२.२. विमानोत्सेधः]

[1]विमानोत्सेधं विभजेच्चतुर्विंशतिभागिकम्।
[2]द्विभागाभ्यामधिष्ठानं द्विगुणं पाददैर्घ्यकम्[3] ॥ ७ ॥
मञ्चोत्सेधं द्विभागं स्यादादिभूम्येवमेव तु[4] ।
त्रिपादाधिकवह्न्यंशमूर्ध्वस्तम्भस्य तुङ्गकम्[5] ॥ ८ ॥
अध्यर्धं प्रस्तरोत्सेधं त्रिभागं चोर्ध्वपादकम्[6] ।
पादाधिकं तु यद्भागमूर्ध्वमञ्चोच्छ्रयं भवेत्[7] ॥ ९ ॥
अर्धांशं वेदिकोत्सेधं भागं ग्रीवमुदाहृतम्।
[8]त्रिभागार्धं शिरोत्सेधं शेषभागं शिखा भवेत्[9] ॥ १० ॥

[२.३. विविधलक्षणम्]

चतुरश्रमधिष्ठानं चतुरं शिखरं भवेत्[10] ।
[11]अधिष्ठानसमं सूत्रमन्तरालं तु निम्नकम्[12] ॥ ११ ॥
समं त्रिपादमर्धं वा मुखमण्डपमिष्यते।
मण्डपं तु त्रिधा भज्यं मध्यमे तोरणं कुरु[13] ॥ १२ ॥
शालामध्ये तु कर्तव्यं तोरणं विधिना सह।

---

१. C, D omettent 7ab.

२. F^1 lacune 7d-9a.

३. 7d पाद°] F^2, भाग° A^1, भाग° A^2, G, वात° C^1, D, वा तु° C^2.

४. 8b °दादिभूम्येवमेव तु] SNB., °दादिवामेवमेव तु A^1, °आदिर्वामेनमेव तु A^2, C, °आदिर्वामेवमेव तु D, °अधिष्ठा एवमेव तु F^2, °अतिर्वामेनमेव च G.

५. 8c °धिकवह्न्यांश°] Eds., °धिकबाह्यांश° A, C^1, D^2 (?), F^2, G, °दधिकबाह्य° C^2, D^1 ; 8d °स्तम्भस्य] A^2, C, D, F^2, G, °कुम्भस्य A^1.

६. 9a अध्यर्धं] A, C^1, D, F^2, G, अर्धार्दं C^2 ; प्रस्तरोत्सेधं] A^2(etc.), विस्तरोत्सेधम् A^1 ; 9b त्रिपादार्धं चोर्ध्वपादकम्] C^1, त्रिभागं चोर्ध्वभागिकम् A, D^1, G, त्रिपादोर्ध्वे वेदिकम् C^2, शेषभागं शिखा भवेत् D^2, त्रिपादोर्ध्वोर्ध्वपादकः F.

७. 9d lacune C^1.

८. F^1 et F^2 remplacent 10 cd par : शिखरोच्चं त्रिभागार्धं (त्रिभागोच्चं F^2) शेषं स्थूपिरिति स्मृतं।

९. 10c शिरोत्सेधं] A, C^2, शिखरोत्सेधं (*v.f.*) C^1, D, G.

१०. 11b चतुरं शिखरं] A, चतुरश्रं शिखा C^2, चतुरश्रं शिखरं (*v.f.*) C^1, D, F^1, G ; भवेत्] A(etc.), स्मृतम् F.

११. 8.11cd = 7.32cd et 9.73ab.

१२. 11d निम्नकम् A^2, C, D, F, निर्गमम्] A^1.

१३. 12d कुरु] A, G, भवेत् C, D, F.

[२.४. तोरणादिलक्षणम्]

[२.४.१. तोरणम्]

[१]तोरणस्य तु विस्तारमुत्सेधं वक्ष्यतेऽधुना[२] ॥ १३ ॥
पादायामं त्रिधा कृत्वा द्विभागं पाददैर्घ्यकम्[३] ।
शेषभागं झषांशं तु एकांशं विस्तृतं भवेत्॥ १४ ॥
अथवा पादमानं तु दशभागं कृतं पुनः[४] ।
स्तम्भोच्चमृषिभागं स्याच्छेषांशं मकरोदयम्[५] ॥ १५ ॥
तद्विस्तारं चतुर्भागं अथवा तत्त्रिभागिकम्[६] ।
[७] वृतेरुत्तरसीमान्तं तोरणस्योच्छ्रयं भवेत्॥ १६ ॥

[२.४.२. पञ्जरम्]

तत्समं पञ्जरायामं तस्य लक्षणमुच्यते।
पादायामं नवांशं स्यात्पञ्चभागाङ्घ्रिकायतम्[८] ॥ १७ ॥
[९]द्विविधं प्रस्तरोत्सेधमध्यर्धांशं गलोच्छ्रयम्[१०] ।

[११][Lacune]

पादयुक्तं तथा केचित्केचित्पादविहीनकम्॥ १८ ॥
पञ्जरस्य तु विस्तारं द्विदण्डं वा त्रिदण्डकम्।
चतुर्दण्डं वा कर्तव्यमथवा नासिकासमम्[१२] ॥ १९ ॥

[२.४.३. नासीलक्षणम्]

[१३]गर्भगेहं चतुर्भागादेकं च द्वित्रिभागिकम्।

---

१. C^1 : lacune 13d-14d.

२. 13c तोरणस्य] A, C, D, G, तोरणाग्रं F.

३. 14b द्विभागं] A^2, C^2, D, G, द्विपादं A^1, F^1, त्रिपादं F^2.

४. 15a पादमानं तु] A(etc.), पादतारादि F^1, पादमानादि F^2 ; 15b दशभागं कृतं पुनः] A(etc.), दशभागैर्विभाजयेत् F.

५. 15d छेषांशं] A, C^1, D, F, G, च दशांशं C^2.

६. 16b अथवा तत्त्रिभागिकम्] A^2, C, D, G, अथवा तत्र भागिकम् A^1, अष्टभागं त्रिभागिकम् F^1, lacune F^2.

७. 8.16cd = 7.19 ab

८. 17d भागाङ्घ्रिकायतम्] C, D, पादाङ्घ्रिकोदयम् A, G, भागोच्छ्रयायतम् F.

९. C^1 : lacune 18b-18d.

१०. 18b अध्यर्धांशम्] A, C, D, F, अर्धार्धांशम् G.

११. Lacune générale (description du toit et du motif de couronnement).

१२. 19c दण्डं वा] A^2, C^2, G, दण्डं च A^1, C^1, D, F.

१३. F^1 et F^2 remplacent 20ab-20cd par :

[1]महानास्याश्च विस्तारं चतुर्भागं तदुच्छ्रयम्[2] ॥ २० ॥
तद्विस्तारद्विभागं वा त्रिपादद्वयमेव वा[3] ।
पङ्क्तिद्वयसमायामं तस्यार्धं विस्तृतं भवेत्[4] ॥ २१ ॥
दण्डतारद्विदण्डं वा अनुनासी च विस्तृतम्[5] ।

[२.५. पुनर्भद्रललितस्य विविधलक्षणम्]

[6]पूर्वोक्तगण्यमानेन कूटशालाभिरन्वितम्[7] ॥ २२ ॥
प्रस्तरं पूर्ववत्कुर्यात्पूर्वोक्तपादलक्षणम्।
[8]अष्टकूटसमायुक्तमष्टशालासमन्वितम्[9] ॥ २३ ॥
[10]पञ्जरैः षोडशैर्युक्तं महानासीचतुष्टयम्।
[11]चतुष्षष्ट्यनुनासीभिरावृतं चापि सुन्दरम्॥ २४ ॥
एतद्च भद्रललितं सर्वशान्तिकरं परम्[12] ।

[३. विमलाकृतिः]

[३.१. विस्तारः]

नवहस्तं तु विस्तारं सप्तभागेन भाजयेत्॥ २५ ॥
एकांशं कूटविस्तारमेकांशं कोष्ठमेव च[13] ।
हारा चैकांशमेवं स्याद्धारापञ्जरशोभितम्[14] ॥ २६ ॥

महानास्यां च विस्तारं गर्भगेहार्धमेव च ।तस्यार्धं वापि कर्तव्यं चतुर्भागैकमुच्छ्रयम्॥

१. C^2 : lacune de 20d à 22c.

२. 20c महानास्याश्च] Eds., महानासी च A, G, महानासीति C, D.

३. 21a तद्विस्तारद्विभागं] A^1, तद्विस्तारार्धभागं C^2, D, F, G, ततस्ताराग्रभागं A^2.

४. 21c पङ्क्तिद्वय°] Eds., शक्तिद्वय° A, शक्तिध्वज° C^2, D, शत्तध्वज° F^1, lacune F^2.

५. 22b अनुनासी च] A, G, अनुनासीति C^2, D, क्षुद्रनासां च F.

६. F^1 et F^2 omettent 22cd-23ab.

७. 22c °गण्य°] G, °गन्य° A^1, °दण्ड° A^2, °मन्य° C^2, D.

८. 8.23cd = 8.64cd.

९. 23cd अष्टशालासमन्वितम्] A, C, D, G, चतुश्शालाभिरन्वितम् F^1.

१०. F^1 et F^2 remplacent 24ab par : षोडशा पञ्जरोत्तस्मिन्महानासि चतुर्थका।

११. C^1 : lacune 25a-27a.

१२. 25a एतद्च भद्रललितं] A^1, G, एतद्च भाषितं A^2, एतद्भद्रललितम् D, प्रतद्भद्रं च ललितं C^2, सुभद्रं ललितं F.

१३. 26b एकांशं कोष्ठमेव च] A, C^2, D, G, शालायामद्वयं भवेत् F.

१४. 26d °द्धारापञ्जरशोभितम्] A, G, °द्धारापञ्जरशोभिता C^2, D, °दर्धभागं चोच्छ्रयं भवेत् F.

[1]पञ्चभागोर्ध्वभूमिः स्यात्तस्योर्ध्वे भूस्त्रिभागिकम्[2] ।

[३.२. विमानोत्सेधः]

विमानोत्सेधं विभजेच्चतुर्विंशतिभागिकम्॥ २७ ॥

[3][Lacune]

[३.३. विविधलक्षणम्]

अष्टकूटं क्रमात्प्रोक्तं शाला द्वादश चैव च[4] ।

[5]अष्टाश्रं शिखरं तस्य महानास्यष्ट एव च[6] ॥ २८ ॥

[7]अष्टाभिः पञ्चरैर्युक्तमादिभूमिरिति स्मृतम्[8] ।

विंशच्छतानुनासीभिरावृतं लक्षणैर्युतम्[9] ॥ २९ ॥

वेदिकाष्टाश्रमेवं स्याद् ग्रीवं तस्याकृतिर्भवेत्[10] ।

[11]नानालंकारसंयुक्तं नानापत्रलतायुतम्[12] ॥ ३० ॥

[13]सर्वालंकारसंयुक्तं चतुरश्रं कुट्टिमं भवेत्[14] ।

एभिस्तु लक्षणैर्युक्तं विमलाकृतिनामकम्[15] ॥ ३१ ॥

---

१. F^1 et F^2 remplacent 27ab-27cd par :
वेदिकोच्चं तथार्धांशं ग्रीवं भागमुदाहृतम्। त्रिभागं शिखरोत्सेधं शेषभागं शिखा भवेत्॥

२. 27b भूस्त्रि°] D^1, भूमि° A, G, भूत्रि° C, D^2.

३. Lacune générale après 27cd (liste et proportions des éléments de l'élévation).

४. 28a अष्टकूटं] D^2, F^2, अष्टाकूटं A, C, F^1, G, क्रमात्प्रोक्तं] C^2, D, क्रमा शला A, क्रमं प्रोक्तं C^1, भवेत्तस्मिन् F, lacune G ; 28b शाला द्वादश चैव च] C, D, द्वादशं चैवमेव च A, शलाद्वादशैव च F, + + द्वादशमेव च G.

५. C^1 : lacune 28c-31a ; F^1 et F^2 intercalent entre 28ab et 28cd un demi-vers qui reprend des éléments de 29 omis par ces manuscrits : विंशद्भिः पञ्चरायुतमनुनासिशतान्वितम्।

६. 28c तस्य] A, C, D, F^2, G, तस्मिन् F^1 ; 28d °नास्यष्ट एव] D^2, F^2, G, °नास्यष्टमेव A, C, D^1, °नाष्टस्य F^1.

७. F^1 et F^2 omettent 29ab-29cd.

८. 29b आदिभूमिरिति स्मृतम्] A, D^1, G, मातिभूमिरिदं मतम् C^2, D^2.

९. 29c विंशच्छतानुनासी°] C^2, D विंशच्च चानुनासी° A, G.

१०. 30b ग्रीवं तस्याकृतिर्] D, F, G, ग्रीवं तस्य तु त्रिर् A^1, C^2, श्रीवत्सस्याकृतिर् A^2.

११. C^2 omet 30d-31a.

१२. 30c नानालङ्कार°] A(etc.), नानाशृङ्गर° F ; 30d °पत्रलता°] A, C, D, G (?), °रूपलता° F.

१३. F^1 et F^2 remplacent 31ab par : समस्तपादमर्धं वा मण्डपं तस्य कीर्तितम्।

१४. 31b कुट्टिमं] (*v.f.*) A, G, कुटिकं (*v.f.*) C^1, कूटिकं (*v.f.*) C^2, कुट्टिकं (*v.f.*) D.

१५. 31d विमलाकृतिनामकम्] A^2, C, D, G, विल्मल्ल तु त्रिमानकम् A^1, प्रासादं

[४. हस्तिपृष्ठम्]

[४.१. विस्तरः]

एकादशकरं व्यासं सप्तदशकरोच्छ्रयम्[१] ।
चतुर्भागमथाधिक्यमायामं वृत्तमिष्यते॥ ३२ ॥
[२]द्व्यश्रवृत्तमधिष्ठानं तद्वच्छिखरमिष्यते।
तद्विस्तारार्धमानेन वर्तितं वर्तुलं भवेत्॥ ३३ ॥
[३]तत्प्रमाणसमं द्व्यश्रं द्व्यश्रात्पार्श्वे तु पृष्ठकम्[४] ।
कृत्वा भागं चतुर्विंशं द्व्यंशं सौष्ठिकविस्तरम्॥ ३४ ॥
[५]द्व्यंशं कोष्ठायतं विद्धि आयामार्धं तु विस्तरम्[६] ।
अंशेन पञ्जरायाममंशे हारं च निम्नकम्॥ ३५ ॥
समं त्रिभागमर्धेन मुखमण्डपमेव च[७] ।
मण्डपं समसूत्रं स्यादन्तरालं तु निम्नकम्॥ ३६ ॥
कूटकोष्ठादिसर्वाङ्गं मानसूत्राद्बहिः स्थितम्[८] ।
[९]सव्यासार्धं तदध्यर्धं दण्डे वा द्वित्रिदण्डकम्[१०] ॥ ३७ ॥
मानसूत्राद्बहिस्तेषां निर्गतिः परिपठ्यते।
षड्भागं स्यात्तदूर्ध्वे तु तस्योर्ध्वे भूश्चतुर्थकम्[११] ॥ ३८ ॥

विमलाकृतिः F.

१. 32a व्यासं] C, D, व्यालं A, G, तारम् F ; 32b सप्तदशकरोच्छ्रयम्] C, D^2, G, सप्तादशकरोच्छ्रयम् A, D^1, अष्टभागैर्विभजितम् F.

२. C^1 : lacune 33a-34b.

३. G : lacune 34a.

४. 34b द्व्यश्रात्पार्श्वे तु पृष्ठकम्] Eds., द्व्यश्रात्पार्श्वे तु प्रष्ठकम् A^1, द्व्यश्रात्पार्श्वे तु पृष्ठकः A^2, G, पार्श्वेन च स पृष्ठतः C^2, अश्रात्पार्श्वेऽथ पृष्ठतः D, अग्रपार्श्वे तु पृष्ठतः F^1, lacune F^2.

५. C, D, omettent 35ab ; F^1 et F^2 le remplacent par : द्वाभ्यां कोष्ठयतं विद्धि स्वायामार्धेन विस्तरम्।

६. 35a द्व्यंशं] A^1, G, परं A^2, समं D.

७. 36a अर्धेन] Eds., अंशेन A, D, G, त्र्यंशेन C, द्व्यंशेन F.

८. 37b मानसूत्राद्] A, C, D, F^2, G, उपानं सूत्र॰ F^1.

९. C^1 : lacune 37d-38b.

१०. 37c तदध्यर्धं] G, तदस्यार्ध॰ A, D, ततस्यार्धं C, तदर्धार्ध॰ F ; 37d दण्डे] A, दण्डो C^2, D, G, F.

११. 38c षड्भागं स्यात्तदूर्ध्वे तु] F^2, षड्भागं स्यात्तदूर्ध्वकं F^1, ऊर्ध्वभागं तु भागं स्यात् A, C, D, G.

[४.२. उन्मानम्]

[१]एकपञ्चाशदंशं तु कृत्वा हर्म्यायतं बुधः[२] ।
पादाधिकं चतुर्भागं तस्योत्सेधमितीष्यते[३] ॥ ३९ ॥
द्विगुणं पादमुत्सेधं मञ्चोच्चं चतुरंशकम्[४] ।
अष्टार्धांशमधःस्तम्भं मञ्चमानं तलात्समम्[५] ॥ ४० ॥
[६]अष्टांशं चोर्ध्वपादोच्चं प्रस्तरोच्चं चतुर्थकम्[७] ।
सप्तांशं चोर्ध्वपादोच्चं प्रस्तरोर्ध्वं त्रिभागिकम्॥ ४१ ॥
अध्यर्धं वेदिकोत्सेधं प्रस्तरोपरि कारयेत्[८] ।
द्विभागं ग्रीवमुत्सेधं शिखरं सप्तभागिकम्॥ ४२ ॥
शेषांशं स्थूपिकायाममेतत्त्रितलमानकम्।

[४.३. विविधलक्षणम्]

अष्टकूटं तथा शाला पञ्चरैः षोडशैर्युतम्॥ ४३ ॥
महानासीभिरित्युक्तमनुनासीभिरन्वितम्[९] ।
अष्टाधिकशतं कुर्यादल्पनासी चतुर्दिशि॥ ४४ ॥
[१०]शिरसां पूर्वनेत्रं तु पश्चिमं वापि कारयेत्।
त्रयस्थूपिसमायुक्तं तोरणैस्त्रिभिरन्वितम्[११] ॥ ४५ ॥
नानापादसमायुक्तं नानारूपविचित्रितम्।

---

१. F^1 et F^2 remplacent 39-45c, par : प्रासादोत्सेधमानं तु कृत्वापञ्चतांशकम्। चत्वार्यंशमधिष्ठानमाष्टांशं पाददैर्घ्यकम्। चत्वारि मञ्चमानं स्यातष्टांशं चोर्ध्वपादकम्॥

२. 39a एकपञ्चाशदंशं] A, G, एकपञ्चदशांशं C, D^2, अष्टाष्टाराका पञ्चदशांशं D^1 ; 39b हर्म्यायतं] A, C, D^2, G, भूम्यायतं D^1.

३. 39d तस्योत्सेधमितीष्यते] D^2, तस्योत्सेधंच मिष्यते A, C^1, तस्योत्सेधं समिष्यते C^2, तस्योत्सेधमिष्यते D^1, तस्योत्सेधोर्ध्वमीष्यते G.

४. 40b मञ्चोच्चं चतुरांशकम्] Eds., पञ्चोत्सेधं चतुरश्रकम् A^1, पञ्चोत्सेधं चतुरर्धकम् A^2, C, D, G.

५. 40c अधःस्तम्भं] C, D, G, अधःस्थानं A^1, अथ तालं A^2 ; 40d मञ्चमानं तलात्समम्] C, D, भागं तालात्समं भवेत् A, lacune G.

६. C^2 omet 41b-41c.

७. 41a अष्टांशं चोर्ध्वपादोच्चं] A, G, अष्टाविंशोर्ध्वभागोच्चं C, D.

८. 42a अध्यर्धं] A, C, D, अर्धार्धं G.

९. 44b अन्वितम्] C^2, D, अप्युतम् A, G.

१०. C^1 : 45ab lacunaire ; F^1 et F^2 en donnent cette version : प्रस्तरोच्चत्रिभागं स्यात्पञ्चमे वापि कारयेत्।

११. 45c त्रय॰] C, D, यत्र A, G, तिस्र॰ F ; 45d तोरणैस्त्रिभिरन्वितम्] F, तोरणैरभिरन्वितम् A, D^2, G, तोरणैरभिसञ्चितम् C, D^1, lire peut-être : तोरणैरभिरञ्चितम् (SNB.).

सोपपीठतलं वापि केवलं वा मसूरकम्॥ ४६ ॥

हारान्तरस्तम्भमध्ये पादायतनमारभेत्[१] ।

हस्तिपृष्ठमिदं नाम सर्वदेवेषु योग्यकम्॥ ४७ ॥

[५. दिशाभद्रम्]

[५.१. विस्तरः]

त्रयोदशकरं तारं नवभागैर्विभाजयेत्।

एकांशकूटविस्तारं शालायामं द्विभागकम्[२] ॥ ४८ ॥

हारायामद्विभागं स्याद्धारपञ्जरशोभितम्[३] ।

तदूर्ध्वे सप्तभागं स्यात्पञ्चभागोर्ध्वभूमिकम्[४] ॥ ४९ ॥

[५.२. विमानोत्सेधः]

तावत्प्रासादतुङ्गं तु द्विचत्वारिंशदङ्गकम्[५] ।

त्रिभागार्धमधिष्ठानं पादमानं तु सप्तकम्[६] ॥ ५० ॥

त्रिभागं प्रस्तरोत्सेधं षडर्धं चोर्ध्वपादकम्[७] ।

त्रिभागं प्रस्तरोच्चं स्यादूर्ध्वपादं षडंशकम्[८] ॥ ५१ ॥

द्विभागं चोर्ध्वमञ्चोच्चमर्धांशं वेदिकोच्छ्रयम्[९] ।

अध्यर्धांशं गलोत्सेधं शिखरं पञ्चभागिकम्॥ ५२ ॥

शेषं स्थूपिरिति ख्यातं प्रासादं त्रितलं भवेत्।

[५.३. विविधलक्षणम्]

चतुर्भागसमाधिक्यमायामं चतुरश्रकम्॥ ५३ ॥

---

१. 47a हारान्तरस्तम्भ°] A, G, हारा नरस्य तन्° C, D, हारान्तरस्य तन्° F^1 ; 47b पादायतनमारभेत्] A, C, D, G, कुर्यादायतनं पुनः F.

२. 48c एकांशकूटविस्तारं] A, C, D, G, कूटविस्तारमेकांशं F.

३. 49a °द्विभागं स्याद्] A, C^2, G, °त्रिभागं स्याद् C^1, D, अथ द्वर्धं F.

४. 49c तदूर्ध्वे] A, F, G, lacune C^1, तस्योर्ध्वे C^2, D ; 49d पञ्चभागोर्ध्वभूमिकम्] C^1, D, G, + + + पञ्चभूमिकम् A, पञ्चभागोर्ध्वभागिका C^2, पञ्चभागतदूर्ध्वतः F.

५. 50b द्विचत्वारिंशदङ्गकम्] A^1, चत्वारिंषत्तुङ्गकम् C^1, G, चत्वारिंशति तुङ्गकम् C^2, D, द्विचत्वारिंशदंशकम् F.

६. 50d पादमानं तु सप्तकम्] A, C, D, G, सप्ताङ्गं पादतुङ्गकम् F.

७. 51a त्रिभागं प्रस्तरोत्सेधं] A^1, C, D, F^2, G, अस्तं स्यात्त्रिभागार्धं F^1 ; 51b षडर्धं चोर्ध्वपादकम्] Eds., षड्विंशं चोर्ध्वपादकम् A, C, D, G, ऊर्ध्वभागं षडर्धकम् F.

८. 51c त्रिभागं] C, D, F, त्रिपादं A, G.

९. 52a द्विभागं चोर्ध्व°] A^1, D^2, त्रिभागार्धोर्ध्व° C, द्विभागर्धं चोर्ध्व° A^2, D^1, G, मञ्चत्रिभागार्धं F.

ग्रीवं वृत्तायतं कुर्याच्छिखरं वृत्तयातं भवेत्[१] ।
स्थूपित्रयं तु कर्तव्यमष्टकूटसमायुतम्॥ ५४ ॥
अष्टशालासमायुक्तं पञ्जरैः षोडशैर्युतम्।
महानासीचतुर्युक्तमनुनासिविभूषितम्॥ ५५ ॥
चतुर्विंशाधिकशतैरल्पनासीभिरन्वितम्।
एभिस्तु लक्षणैर्युक्तं दिशाभद्रमिति स्मृतम्॥ ५६ ॥

[६. गान्धारम्]

[६.१. विस्तारः]

दशपञ्चाधिकं हस्तं विस्तरेण विधीयते[२] ।
[३]एकविंशतिहस्तेन आयामं तस्य कीर्तितम्[४] ॥ ५७ ॥
दशभागायतं भज्य एकांशं कूटविस्तरम्।
शालायामं द्विभागं स्यादेकैकं हस्तितुण्डकम्[५] ॥ ५८ ॥
[६]कूटकोष्ठगजतुण्डैर्मध्यहारविभूषितम्[७] ।
परितः खण्डहर्म्यांशम् अलिन्द्रं परितो भवेत्॥ ५९ ॥
तदूर्ध्वे षड्भागयुक्तं चतुर्भागोर्ध्वभूमिकम्[८] ।

[६.२. विमानोत्सेधः]

विमानोत्सेधमेकेन पञ्चाशद्विर्विभाजयेत्[९] ॥ ६० ॥
[१०]चतुर्भागमधिष्ठानमष्टभागाङ्घ्रिकायतम्[११] ।
तुर्यांशं प्रस्तरोत्सेधं सप्तार्धं चोर्ध्वपादकम्[१२] ॥ ६१ ॥

---

१. 54a ग्रीवं] C, D, F, वृत्तं A, G ; 54b वृत्तायतं] (*v.f.*) A^2, D, G, वृत्तकं A^1, lacune C^1, प्रायतं C^2, तद्वदेव F.

२. 57b विस्तरेण विधीयते] A(etc.), कुर्यात्प्रासादविस्तरम् F.

३. F^1 et F^2 omettent 57cd.

४. 57c एकविंशतिहस्तेन] A, C^2, D, G, एकहस्तं विंशतिहस्तेन C^1.

५. 58d एकैकांशं हस्तितुण्डकम्] A, C, D, G, एकेन गजतुण्डकम् F.

६. F^1 et F^2 remplacent 59ab-59cd par : अंशेन खण्डहर्म्यं स्याद्दशांशेनार्धमेव वा ।

७. 59a गजतुण्डैः] C^2, गनैस्तुण्डैर् A^1, गजैस्तुण्डैर् A^2, C^1, D, G.

८. 60a तदूर्ध्वे षड्भागयुक्तं] C^1, D, G, तदूर्ध्वं भागयुक्तं च A^1, C^2, तदूर्ध्वषड्भागयुक्तं च A^2, षड्भागं स्यात्तदूर्ध्वे तु F^1.

९. 60c °त्सेधमेकेन] A, D, F^2, G, °च्चं शिखरोच्चं C, °त्सेधमेकोन F^1.

१०. F^1 et F^2 omettent 61d, 62ab et 62c et remplacent 61ab-61c par : चत्वार्यङ्गमधिष्ठानं पादमष्टांशमेव च। चत्वार्यङ्गं प्रस्तरोत्सेधम्

११. 61b अष्टभागाङ्घ्रिकायतम्] C, D^1, अष्टभागस्य चायतम् A, G, lacune D^2.

१२. 61d चोर्ध्वपादकम्] A, G, चोपपादकम् C^1, D, चोपपीठकम् C^2.

[1][Lacune]

त्रिभागं प्रस्तरोच्चं स्याद्भागैकं वेदिकोच्छ्रयम्।
द्विभागाभ्यां गलोत्सेधं शिखरोच्चं षडर्धकम्[2] ॥ ६२ ॥
शेषभागं शिखोत्सेधं भूमौ भूमौ विधीयते[3] ।

[६.३. विविधलक्षणम्]

कूटकोष्ठगजतुण्डं समसूत्रे विधीयते[4] ॥ ६३ ॥
[5]चतुरश्रमधिष्ठानं चतुरं शिखरं भवेत्[6] ।
अष्टकूटसमायुक्तमष्टशालासमन्वितम्॥ ६४ ॥
[7]हस्तितुण्डाष्टसंयुक्तं चतुर्विंशतिपञ्जरैः[8] ।
महानासीचतुर्युक्तमनुनासीभिरन्वितम्॥ ६५ ॥
अष्टाविंशच्चतुर्नासी चतुर्दिक्षु समन्वितम्।
एभिस्तु लक्षणैर्युक्तं गान्धारं नाम हर्म्यकम्[9] ॥ ६६ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे त्रितलप्रासादपटलो नामाष्टमः[10] ॥

---

१. Lacune générale (entablement du 2ème palier et niveau des piliers du 3ème).

२. 62c गलोत्सेधं] A, G, शवोत्सेधं C^1, शिरोत्सेधं C^2, lacune D ; 62d शिखरोच्चं षडर्धकम्] C^2, शिखरोर्ध्वं षडर्धकम् A, C^1, D^1, G, शिखरस्यात् षडंशकम् F.

३. 63a शेषभागं शिखोत्सेधं] Eds., + + + शिखरोत्सेधं A, C, D, G, शेषभ्याङ्गं शिखरोत्सेधं (*v.f.*) F^1, शेषभागं शिखरोत्सेधं (*v.f.*) F^2 ; 63b भुमौ भूमौ विधीयते] A, C, D, G, कुर्याद्देवं विशेषतः F.

४. 63c समसूत्रे] A^2, C, D, F, G, सोमसूत्रे A^1.

५. 8.64ab = 8.23cd.

६. 64b चतुरं शिखरं भवेत्] A(etc.), शिखरं तद्वदेव हि F.

७. F^1 et F^2 remplacent 65ab-65cd par :
पञ्जराभिश्चतुर्विंशद्गजतुण्डाष्टकैर्युतम्। चतुर्भिर्महानासीभिः अनुनासिभिरन्वितम्॥

८. 65b चतुर्विंशतिपञ्जरैः A, D^1, G, चतुर्विंशत्पञ्जरान्वितम् C, चतुर्विंशत्पञ्जरैर्युतम् D^2.

९. 66d गान्धारं नाम हर्म्यकम्] A(etc.), हर्म्यगन्धारमानकम् F. F^1 et F^2 ajoutent avant le colophon: त्रितलं च समाख्यातं चतुस्तलमथो शृणु।

१०. A^2, G, D^1: इति दीप्ताशास्त्रे प्रतिष्ठातन्त्रे त्रितलप्रासादपटलो नाम नवमः ; C^1 : इति दीप्ताशास्त्रे प्रतिष्ठातन्त्रे पञ्चताल(*sic*) [lacune] अष्टमः पटलः ; C^2 इति दीप्ताशास्त्रे प्रतिष्ठातन्त्रे पञ्चताल(*sic*) प्रासादविधिरष्टमः पटलः ; D^2 : इति दीप्ताशास्त्रे प्रतिष्ठातन्त्रे त्रितलप्रासादपटलो नवमः ; F : इति दीप्ताशास्त्रे प्रतिष्ठायां प्रासादो नाम नवमपटलः।

[नवमः पटलः]
[चतुर्भूमिविधिः][१]

अतः परं प्रवक्ष्यामि चतुर्भूमेस्तु लक्षणम्।

[१. चतुर्भूमिप्रासादमानम्]

पञ्चमानप्रमाणेन प्रासादं वक्ष्यतेऽधुना[२] ॥ १ ॥
नवहस्तं समारभ्य सप्तदशकरान्तकम्[३] ।
पञ्चधा विस्तरं प्रोक्तं प्रासादानां विशेषतः ॥ २ ॥
विस्तारद्विगुणोत्सेधं नवैकादशहस्तकैः[४] ।
[५]पादोनद्विगुणोत्सेधमन्तरौ वा विमानकौ[६] ॥ ३ ॥
शेषं चाध्यर्धमुत्सेधं पादुकादिशिखान्तकम्[७] ।

[२. सौम्यम्]

[२.१. विस्तारः]

नवहस्तप्रविस्तारमष्टधा विभजेत्पुनः[८] ॥ ४ ॥
एकांशं कूटविस्तारं हारतारद्वयं भवेत्[९] ।
हारमध्ये तु भागेन पञ्जराणि तु कल्पयेत्[१०] ॥ ५ ॥
[११]शालायामद्विभागेन भागैकं विस्तरं भवेत्[१२] ।

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. 1d प्रासादं वक्ष्यतेऽधुना] A, C, D, G, प्रासादविधिनाधुना F

३. 2a सप्तदश°] A^2, C^2, F^2, G, सप्तादश° A^1, C^1, D, F^1, G(var.).

४. 3b नवैकादशहस्तकैः] A, C, D, G, नवहस्ता सुकीर्तितम् F^1, नैव हस्तस्य कीर्तितम् F^2.

५. F^1 et F^2 omettent 3cd-4ab.

६. 3c पादोन°] A, C^2, G, पादोनं C^1, पादेन D ; 3d अन्तरौ वा विमानकौ] Eds., मत्रको वा विमानकं A, मत्रको वा विमानकौ C, D, त्रिकोणं वा विमानकम् G.

७. 4a चाध्यर्धं] A, D^2, G, चात्यर्धं C, चार्धार्धम् D^1 ; 4b °शिखान्तकम्] A, D^1, G, °शिखान्तरम् C, D^2.

८. 4d पुनः] A, C, D, G, ततः F.

९. 5b हारतार°] A, D^1, F, G, हारद्वार° C, भारदान° D^2.

१०. 5d पञ्जराणि तु कल्पयेत्] A^1, पद्मानि च प्रकल्पयेत् C^2, पद्मराणि प्रकल्पयेत् C^1, D, पञ्जराणि प्रकल्पयेत् A^2, G, पञ्जरः संप्रकल्पयेत् F.

११. 6ab lacunaire dans C.

१२. 6a °यामद्विभागेन] A^1, D, G, °यामं द्विभागेन A^2, °यामद्विभागाभ्याम् F ; 6b भागैकं विस्तरं भवेत्] A, D, G, कल्पयेत्कल्पवित्तमः F.

[१]ऊर्ध्वं चैव चतुर्भागं कूटकोष्ठैर्विभूषितम्[२] ॥ ६ ॥
तस्योर्ध्वे तु चतुर्भागं सकलं तत्षडंशकम्[३] ।
पूर्ववत्कूटकोष्ठानि चोर्ध्वे वेदांशकं भवेत्[४] ॥ ७ ॥

[२.२.उन्मानम्]

विमानोत्सेधमानं तु द्विचत्वारिंशदंशकम्[५] ।
त्रिभागाभिरधिष्ठानं द्विगुणं पाददैर्घ्यकम्[६] ॥ ८ ॥
[७]प्रस्तरं त्रिभिरंशेन पञ्चार्धं चोर्ध्वपादकम्[८] ।
[९]पादहीनं त्रिभागेन मञ्चोत्सेधं प्रकल्पयेत्[१०] ॥ ९ ॥
[११]ऊर्ध्वभूमिस्तु पञ्चांशं मञ्चमध्यर्धमिष्यते[१२] ।
चतुर्भागार्धमुत्सेधमूर्ध्वस्तम्भस्य कीर्तितम्॥ १० ॥
द्विभागं मञ्चमानं स्यादेकांशं वेदिकोच्छ्रयम्[१३] ।
अध्यर्धं तु गलोत्सेधमङ्गचत्वारिशीर्षकम्[१४] ॥ ११ ॥
शेषांशं स्थूपिमानं स्याच्चतुर्भूमौ विशेषतः[१५] ।

[२.३. अधिष्ठानादिविविधलक्षणम्]

चतुरश्रमधिष्ठानमष्टाश्रं शिखरं भवेत्॥ १२ ॥

---

१. F[1] et F[2] remplacent 6cd par : तद्भाद्या तदूर्ध्वे भूः कूटकोष्ठैर्विभूषितः।

२. 6c ऊर्ध्वं चैव चतुर्भागं] A, ऊर्ध्वभूमिचतुर्भाग° C, D ऊर्ध्वभागं चतुर्भागं G.

३. 7a तस्योर्ध्वे तु] A, C, D, G, तस्योर्ध्वे भूश् F.

४. 7d चोर्ध्वे] G, ऊर्ध्वे A[1], चोर्ध्व° A[2], C[2], ऊर्ध्वं F[1], ऊर्ध्व° F[2].

५. 8a विमानोत्सेधमानं तु] C, D, विमानोत्सेधतन्मानं A, G, विमानोत्सेधं विभजेद् F.

६. 8c त्रिभागाभिरधिष्ठानं] F, द्विभागं हिरधिष्ठानम् A, द्विभागाभिरधिष्ठानं C[1], D, द्विभागान्निरधिष्ठानम् C[2], द्विभागं तिरधिष्ठानं G ; 8d पाददैर्घ्यकम्] A, C[1], D, F, G, पार्श्वसैर्घ्यकम् C[2].

७. A et G omettent 9b-9c.

८. 9b °पादकम्] F, °पट्टिका C[1], °पट्टिकम् C[2], D.

९. F[1] et F[2] remplacent 9cd par : पादत्रिभागेन पञ्चोत्सेधपूर्वकल्पयेत्।

१०. 9d मञ्चोत्सेधं] Eds., पञ्चोत्सेधं A, C, D, G.

११. F[1] et F[2] remplacent 10ab par : ऊर्ध्वं पञ्चांशमध्यर्धं तदर्धं प्रस्तरोन्नतम्।

१२. 10b मञ्चमध्यर्धम्] A[1] , G, मञ्चमत्यर्थम् A[2], मञ्चोच्चाध्यर्धम् C, D.

१३. 11a मञ्चमानं] A[2], पञ्चमानं A[1](etc.).

१४. 11d अङ्गचत्वारिशीर्षकम्] A, C, D, G, शिखरस्य चतुर्थकम् F[1], शिखरः स्याच्चतुर्थकम् F[2].

१५. 12a शेषांशं स्थूपिमानं] C, D, शेषं स्थूपिविमानं A, G, शेषांशत्रिभिरायामं F.

अधिष्ठानसमं सूत्रमन्तरालप्रवेशनम्[१] ।
समं त्रिपादमर्धं वा मुखमण्डपमिष्यते॥ १३ ॥
हर्म्यस्य मध्यमे कुर्यात्तोरणं लक्षणान्वितम्[२] ।
द्वारं वै पादालंकारं पूर्ववत्कारयेद्बुधः॥ १४ ॥
सौष्ठिकैर्द्वादशैर्युक्तं शालाभिर्द्वादशैर्युतम्।
पञ्जरैः षोडशैर्युक्तं त्वष्टाभिर्नासिभिर्युतम्[३] ॥ १५ ॥
अष्टाश्रं शिखरं तस्मिंस्तोरणैस्त्रिभिरन्वितम्।
अल्पनासीद्वयाधिक्यं पञ्चाशच्छतमेव च॥ १६ ॥
सौम्यमेतद्विमानं तु सर्वकामफलप्रदम्।

[३. आयादिविधिः]

[३.१. आयादिपरीक्षा]

[४]आयव्ययं च नक्षत्रं योनिवारांशमेव च[५] ॥ १७ ॥
[६]तत्प्रासादेषु सर्वेषु यत्नेन तु परीक्षयेत्।
[७]यावत्प्रासादविस्तारं तावद्भागं सुनिश्चितम्[८] ॥ १८ ॥
पदं प्रति सप्तवृद्धिः स्याद्द्वादशेन हरेत्पुनः[९] ।
शेषमायमिति प्रोक्तं व्ययमत्र विधीयते[१०] ॥ १९ ॥
ऋषिभिर्गुणितं तत्र दशभिर्ह्रासकं व्ययम्[११] ।

---

१. 13a अधिष्ठानसमं] C(etc.), अधिष्ठानं समं A.

२. 14a हर्म्यस्य] C, D, हर्म्यं तु A, G, प्रासादं F ; 14b : तोरणं] A(etc.), प्रासादं F^2.

३. 15d °भिर्नासिभिर्] C, D^2, °भिर्नाडिभिर् A, °भिर्नवभिर् D^1, °भिर्नासिका° F, °भिर्नासीभिर् G.

४. F^1 et F^2 omettent 17cd-29ab ; G : 17cd très lacunaire.

५. 17d योनिवारांशमेव च] A^1, योनिवारांशकानि च C, D.

६. C : lacune 18b.

७. C^1 place 18cd-40cd après 54cd ; C^2 place 18cd-37cd après 54cd.

८. 18d तावद्भागं सुनिश्चितम्] C^1, D^2, तावद्भागं सुनिश्चयम् A, D^1, G, वर्मभागान्तनिश्चितम् C^2.

९. 19a प्रति सप्तवृद्धिः] (*v.f.*) D, प्रति सप्तवृत्तिः (*v.f.*) A, lacune C^1, प्रति सवृत्तिः C^2, वृति सप्तवृत्तिः G ; 19b हरेत्पुनः] C^2, D, G, नरोत्पुनः A^1, नोत्पुनः A^2 (*v.f.*).

१०. 19c शेषमायमिति] G, शेषमायादि त्रि A^1, शेषाययमिति, A^2, C, lacune D ; 19d व्ययमत्र] A^2, C, D^1, G, प्यवमत्र A^1, व्ययमन्त्रं D^2.

११. 20a गुणितं] D, गणितं A, C, G ; 20b दशभिर्ह्रासकं व्ययम्] D^1, दशभिर्ह्रसकाद्वयम् A, दशग्रासं कमव्ययम् C^1, दशाग्रासकमव्ययम् C^2, दशभिर्ह्रासकमव्ययम् D^2, दशभिरग्रासका व्ययम् G.

पूर्ववत्कोष्ठसङ्ख्या तु चाष्टाभिर्गुणितं भवेत्[१] ॥ २० ॥
सप्तविंशतिभिर्ह्रासं शेषाण्यश्वादि गण्यते[२] ।
[३]यच्छेषं तत्र नक्षत्रे तत्पदप्रतिवर्तितः[४] ॥ २१ ॥
त्रिगुणं चाष्टभिर्ह्रासं शेषं केत्वादिकं विदुः[५] ।
तत्कोष्ठं प्रति वृद्धिः स्यात्त्रिसृभिस्सप्तभिर्हरेत्[६] ॥ २२ ॥
शेषं वारमिति प्रोक्तमुच्यते तु शुभाशुभम्।

[३.२. आयादिफलम्]

आयाधिक्यं व्ययं हीनं सर्वसंपत्करं नृणाम्[७] ॥ २३ ॥
तन्मण्डलाधिपो राजा जयं शीघ्रमवाप्नुयात्।
आयहीनं व्ययाधिक्यं रोगदं वास्तुनाशनम्[८] ॥ २४ ॥
ग्रामादीनां च नक्षत्रं राजर्क्षं तु विशेषतः[९] ।
यजमानस्य नक्षत्रं वास्तुर्क्षेणैव शोधयेत्[१०] ॥ २५ ॥
अनुक्तं यत्परित्यज्यमनुरूपं प्रगृह्यताम्[११] ।
ध्वजसिंहोक्षनागश्च यल्लब्धं तच्छुभं स्मृतम्[१२] ॥ २६ ॥
धूमश्चाखरकाकाश्च वर्जयेन्मतिमान्नरः[१३] ।

---

१. 20d चाष्टाभिर्गुणितं] C^2, D, चष्टाभिर्गणितं A^1, अष्टाभिर्गुणितं C^1, चाष्टाभिर्गणितं A^2, G.

२. 21a ह्रासं] C, D^1, ह्रादि A, G ; 21b शेषाण्यश्वादि] A^1, G, शेषान्यग्लादि A^2, शेषान्नं वादि C, शेषान्नं वाभि॰ D.

३. C^1 : lacune 21cd.

४. 21c नक्षत्रे] A, D^2, G, क्षे ++ C^2, नक्षत्रं D^1 ; 21d वर्तितः] A, lacune C^2, पूर्वितं D^1, वर्द्धितम् D^2, भक्तितः G.

५. 22a त्रिगुणं चाष्टभिर्ह्रासं] A^1, G, द्विगुणं चाष्टभिर्ह्रासं A^2, त्रिगुणं घ्राष्ट्रभिर्ह्रासे C^1, त्रिगुणं प्राष्टभिर्ह्रासे C^2, त्रिगुणघ्राष्टभिर्ह्रास॰ D.

६. 22c सप्तभिर्हरेत्] C^2, सर्वभिर्हरेत् A^1, G, सर्पभिर्हरेत् A^2, सर्पभिर्हरैः C^1, सर्वभिर्हरैः D.

७. 23c आयाधिक्यं व्ययं हीनं] A^2, G, आयादित्यव्ययं हीनं A^1, आयाधिक्यं व्ययाहीनं C, D.

८. 24d रोगदं वास्तुनाशनम्] A, G, रोगच्छायास्तुनाशनम् C^1, रोगभारस्य नाशनम् C^2, रोगभवस्तुनाशनम् D.

९. 25b राजर्क्षं तु] A, G, राजेर्लक्षं C^1, राजेल्लक्षं C^2, रजोल्लक्षं D.

१०. 25d वास्तुर्क्षेणैव] A^2, वास्तुक्षेणैव A^1, वास्तुलक्षेण C^1, D^2, वास्तुलक्ष्येण C^2, वास्तुलक्षण D^1, वस्तुकोणैव G.

११. 26b प्रगृह्यताम्] A, G, प्रगृह्यत C^1, D^1, प्रगृह्यते C^2, प्रकुर्वत D^2.

१२. 26c ॰सिंहोक्षनागश्च] SNB., ॰सिंहो च नागा च A, ॰सिंहाश्च नागाश्च C, ॰सिंहोश्च नागाश्च D, ॰सिंहो घनाभावः G ; 26d तच्छुभं] A, D, G, तच्छ्रेयं C.

१३. 27a धूमश्चाखरकाकाश्च] D^1, धूमाश्च करकाराश्च A, धूमश्चाकारकाकाश्च C^1,

आभिचारेण गृह्णीयात्कर्तृभर्तृविनाशनम्[१] ॥ २७ ॥
सूर्यसौरिकुजान्त्यज्यं शेषवारं शुभावहम्[२] ।
एवमुक्तप्रकारेण यत्नेनैव परीक्षयेत्॥ २८ ॥
हस्तं प्रत्यङ्गुलं ग्राह्यं तद्दोषशमनाय च।

[४. कलितम्]

[४.१. विस्तारः]

रुद्रहस्तप्रविस्तारं प्रासादद्विगुणोच्छ्रयम्॥ २९ ॥
विस्तारं दशधा भज्यमेकांशं कूटविस्तरम्[३] ।
शालायामद्विभागाभ्यामेकांशं हस्तिपृष्ठकम्[४] ॥ ३० ॥
अंशेन हारं कर्तव्यमंशेनालिन्दमेव च[५] ।
[६]ऊर्ध्वभूमिस्तु षड्भागं कूटकोष्ठैर्विभूषितम्[७] ॥ ३१ ॥
[८]ऊर्ध्वभूमिश्चतुर्भागं षड्भागेन तु भाजयेत्[९] ।
तस्योर्ध्वे तु चतुर्भागैर्मध्यमे दण्डनिर्गमम्[१०] ॥ ३२ ॥
गर्भगेहं चतुर्भागं त्रिभागं भित्तिविस्तरम्[११] ।

[४.२. उन्मानम्]

हर्म्योत्सेधं समस्तं तु पञ्चाशद्भागया सह[१२] ॥ ३३ ॥

धूमश्चाहरकाकाश्च C^2, D^2, धूमाश्च करकाश्चैव G.

१. 27d कर्तृभर्तृ°] A, C, G, तत्र कर्तृ° D^1, भर्तृकर्तृ° D^2.

२. 28a °सौरिकुजान्त्यज्यं] G, °सौरकुजा त्यज्यं A^1, °सौरिकुजान्त्यन्त्यं A^2, °सौरं परित्यज्य C, D ; 28b शुभावहम्] A, G, प्रगूहनम् C, प्रगृह्य च D^1, प्रग्रहनम् D^2.

३. 30a दशधा भज्यम्] A^1, दशधा भज्य A^2, D, F, G, तु दशभज्य C ; 30b एकांशं कूटविस्तरम्] A(etc.), कूटविस्तारमेकशः F.

४. 30d हस्तिपृष्ठकम्] A, C, D, G, भक्तिकुण्डलम् F^1, भित्तितुण्डकम् F^2.

५. 31a अंशेन हारं कर्तव्यम्] A, G, अंशेन हारकर्तव्या C^1, D, अंशेन हारः कर्तव्यो C^2, हाराचोंशेन F^1, हाराचेनांशेन F^2.

६. C^1 omet 31d-32a.

७. 31c ऊर्ध्वभूमिस्तु षड्भागं] A, C, D, G, तदले षड्भागमेवं स्याद् F^1, तदर्धे षड्भागमेवं स्यात् F^2.

८. D^1 et D^2 omettent 32ab ; F^1 le remplace par : तस्योर्ध्वे चतुर्भागं स्यात्त्रिभागप्रस्तरोन्नतम् ; F^2 qui omet 32cd-34ab donne cette version de 32ab : तस्याग्रोर्ध्वचतुर्भागं षड्भागैर्नैव भाजयेत्। अर्धार्धं नस्तु पञ्चाङ्गमूर्ध्वपादं तु चोन्नतं॥

९. 32b षड्भागेन तु भाजयेत्] A ; षड्भागेन विभावयेत् C, षट्षड्भागेन भजयेत् G.

१०. 32c तस्योर्ध्वे] A, G, तथोर्ध्वे C, D.

११. 33b त्रिभागं] A^1, द्विभागं A^2, C, D, G.

१२. 33c समस्तं तु] C, D, चतुर्थं तु A, G ; 33d पञ्चाशद्] A, D^2, पञ्चतद् C, पञ्चायत D^1.

त्रिभागार्धमधिष्ठानं सप्तांशं स्तम्भदैर्घ्यकम्।
[१]प्रस्तरोच्चं त्रिभागार्धमादिभूमौ विशेषतः[२] ॥ ३४ ॥
षडर्धं चोर्ध्वपादोच्चं सपादं मञ्चं त्र्यंशकम्[३] ।
षड्भागमूर्ध्वपादं तु त्रिभागं प्रस्तरं भवेत्[४] ॥ ३५ ॥
[५]अर्धाधिकं तु पञ्चांशमूर्ध्वपादस्य कीर्तितम्[६] ।
प्रस्तरोच्चं त्रिभागार्धमंशद्वयगलोन्नतम्[७] ॥ ३६ ॥
[८]शिखरं पञ्चभागोच्चं शेषांशैश्च शिखा भवेत्[९] ।

[४.३. अधिष्ठानादिविविधलक्षणम्]

[१०]चतुरश्रमधिष्ठानं शालानिर्गमनं भवेत्॥ ३७ ॥
गजपृष्ठानि सर्वाणि कोष्ठस्याभिमुखं भवेत्[११] ।
कूटशालान्तरे हाराच्छत्रशीर्षकवत्कृतम्[१२] ॥ ३८ ॥
हारायां तु विनासी स्यादावृतं वर्तुलं प्रति[१३] ।
शालात्रिदण्डनीव्रं स्यात्तन्मध्ये तोरणं भवेत्[१४] ॥ ३९ ॥

---

१. A, F^1 et G omettent 34d-36d.

२. 34c प्रस्तरोच्चं] A, C, D, विस्तरोच्चं G.

३. 35a षडर्धं चोर्ध्वपादोच्चं] Eds., षडर्धं चोर्ध्वभागोच्चं C, D, षडर्धयोर्ध्वपादे च F^2 ; 35b सपादं मञ्चं त्र्यंशकम्] Eds., सपादपञ्चत्र्यंशकम् C^1, D, सपादपञ्चत्यंशकम् C^2, त्रिभागं पञ्चमानकम् F^2.

४. 35d प्रस्तरं भवेत्] C, D, प्रस्तरोन्नतम् F^2.

५. F^2 donne cette version de 36ab : अर्धाद्धीनस्तु पञ्चाङ्गमूर्ध्वपादस्य चोन्नतम्।

६. 36a अर्धाधिकं तु] SNB., अर्धाधिकस्य C^1, D, अधाधिकस्य C^2.

७. 36c त्रिभागार्धं] C, D, त्रिभागेन F^2 ; 36d °मंशद्वयगलोन्नतम्] A, C, G, ++++ मुन्नतम् D^1, °मंशद्वयगलांशकम् D^2, वै वेदिकोच्छ्रयं F.

८. F^1 et F^2 remplacent 37ab par : अंशद्वयगलोत्सेधं शिखरं पञ्चभागिकम्। शेषं स्थूपिरिति ख्यातं सर्वशास्त्रविधौ मतः॥

९. 37b शेषांशैश्च शिखा] SNB., शेषांशैः शिखरं A, C, D, G.

१०. C^2 omet 37d-40d et reprend à 41a placé après 18ab.

११. 38a गजपृष्ठानि] A^2, F, G, गजप्रष्ठानि A^1, गणपृष्ठा न C^1, गणपृष्ठानि D ; 38b कोष्ठस्याभिमुखं भवेत्] A, C^1, D, G, + काभिमुखमेव च F^1, कोऽभित्रे मुखमेव च F^2.

१२. 38c हारात्] A^1(etc.), हाराः A^2, हारे F^2 ; 38d °शीर्षकवत्कृतम्] G, °शीर्षावतत्कृतम् A^1, °शीर्षवत्कृतम् (*v.f.*) A^2, °शीर्षभवत्कृतम् C^1, °शीर्षवताकृतम् D, °शीर्षं हिराकृतिः F.

१३. 39a विनासी] A^1, C^1, विनासिकः(*v.f.*) A^2, विनाशी D, विनाशं F, तु नाडी G ; 39b वर्तुलं] G, वृत्तलं A, C^1, D, स्यात्तलं F^2.

१४. 39c शालात्रिदण्डनीव्रं स्यात्] F^2, शाला त्रिदण्डनीव्रक्ति A^1, शाला त्रिदण्डिनी वृत्ति A^2, C^1, D, शालान्तदण्डनिप्रास्यां F^1, शाला त्रिदण्डिवि(?)त्तिः स्यात् G.

[1]सौष्ठिकानां शिरोकारमष्टाश्रं दिक्षु नासिका।
[2]शिखरं वृत्तमेवं स्याद्वेदिका तु तथैव हि[3] ॥ ४० ॥
[4]रविकूटसमायुक्तं शाला चैव तथैव हि।
तत्राष्टौ गजपृष्ठं स्यात्पञ्जरैरष्टभिर्युतम्[5] ॥ ४१ ॥
षड्सप्तत्रिशिराधिक्यं शतमेवानुनासिका[6] ।
एवं नाम्ना तु कलितं सर्वदेवेषु योग्यकम्[7] ॥ ४२ ॥

[५. प्रथमं श्रीप्रतिष्ठितम्]

[५.१. विस्तारः]

त्रयोदशकरं तारं पादोनद्विगुणोच्छ्रयम्।
एकादशेन विभजेत्तद्विस्तारं विचक्षणः[8] ॥ ४३ ॥
[9]गर्भगेहं नवांशं स्याद् द्व्यंशं च भित्तिविस्तरम्[10] ।
सालिन्दं तु तथांशेन खण्डहर्म्यं तथांशके[11] ॥ ४४ ॥
अंशेन कूटविस्तारमंशेन सिंहपञ्जरम्[12] ।
अंशेन हारं कर्तव्यं त्र्यंशैः शालायतं भवेत्[13] ॥ ४५ ॥

---

१. F^1 et F^2 omettent 40ab.

२. D^1 donne cette version de 40cd : शिखरं वृद्धेदिका तु तथैव हि।

३. 40d वेदिका तु तथैव हि] D^1, G, वै तु तीका तथैव हि A^1, द्वै तु दिका तथैव हि A^2, वेदिका कृतैव हि D^2, वेदिकान्तं तथैव च F.

४. A et C^2, omettent 41ab ; F^1 et F^2 en donnent cette version : भानुकूटसमायुक्तं शालाद्वादश एव हि।

५. 41c गजपृष्ठं स्यात्] F, गजपृष्ठौ A, G, गतप्रविष्ठौ C, lacune D^1, गत्पृष्ठौ D^2.

६. 42a °त्रिशिराधिक्यं] A^1, °त्रिराधिक्यं A^2, D, G, च त्रिरधिक्यं C, °तिरधिक्यं F ; 42b शतमेवानुनासिका] A, G, शतमेगनुनासिकम् C, D, शतनाससमन्वितम् F.

७. 42c कलितं] A^1, ललितं A^2, C, D, G, lacune F^1, नलिनं F^2 ; 42d सर्वदेवेषु योग्यकम्] A(etc.), सर्ववेदवाभरणं विदुः F^1, सर्वदेवार्हणं विदुः F^2.

८. 43c एकादशेन] A, C, D, F, एकांशेन G ; 43d तद्विस्तारं विचक्षणः] A(etc.), विस्तरं तु विशेषतः F.

९. 44ab très proche de 77cd.

१०. 44b द्व्यंशं च] A, D^1, द्वियंशं C^1, द्वयांशं C^2, द्व्यंशं (*v.f.*) D^2, द्विभागं F, lacune G.

११. 44c सालिन्दं तु तथांशेन] A(etc.), अलिन्द्रं तु भवेदेशं F ; 44d खण्डहर्म्यं] A, F, G, चण्डहर्म्यं C, D.

१२. 45b °मंशेन सिंहपञ्जरम्] A^2, C, D, G, °मंशेना सिंहपञ्जरम् A^1, सिंहपञ्जरमंशके F.

१३. 45c हारं] C^2, D^1, हारा A, F^2, हार C^1, D^2, हारः G ; 45d त्र्यंशैः] C, त्र्यंशे A, D^2, F, G, अंशैः D^1.

[1]शालामध्ये तु भागेन निर्गते तु विशेषतः।
कूटमप्यर्धविस्तारं विस्तारार्धं तु बाह्यकम्[2] ॥ ४६ ॥
कूटमध्ये विशेषेण निर्गतिं परिकल्पयेत्।
हारान्तरस्य मध्ये तु कुर्यात्कुम्भलतां बुधः[3] ॥ ४७ ॥
[4]ऊर्ध्वभूमिस्तु सप्तांशमंशेन कूटविस्तरम्।
अर्धांशे पञ्जरं कुर्यात् तद्द्व्यंशं कोष्ठकायतम्[5] ॥ ४८ ॥
[6]ऊर्ध्वभूमिस्तु पञ्चांशं तत्षड्भागेन भाजयेत्।
अंशेन कूटविस्तारं शालायामं द्विभागिकम्॥ ४९ ॥
अंशेन हारं कर्तव्यमर्धं पञ्जरशोभितम्[7] ।
कूटपञ्जरशालानामन्तरे लम्बनासिका॥ ५० ॥
कूटे कूटे चतुर्नासी प्रस्तरे तु तथैव च[8] ।
शालामध्ये महानासी कपोते द्वे तु नासिके[9] ॥ ५१ ॥
पञ्जरं नासिकाकारं प्रस्तरं तु विनासिकम्[10] ।
शालामध्ये तु गेहं स्याद् ब्रह्मद्वारे तु योजितः॥ ५२ ॥

[५.२. विविधलक्षणम्]

नानाधिष्ठानसंयुक्तं नानापादैरलंकृतम्।
सप्तकोट्या समायुक्तं कूटकोष्ठं युगाश्रकम्[11] ॥ ५३ ॥
चतुरश्रमधिष्ठानं शालाकूटविनिर्गमम्।

---

१. F^1 et F^2 omettent 46b-47a.

२. 46c कूटमप्यर्ध॰] A, C^1, D, G, कूटमध्यार्ध॰ C^2 ; 46d बाह्यकम्] G, बालकम् A, lacune C^1, वाहकम् C^2, वाभलम् D^1, वा फलम् D^2.

३. 47c मध्ये तु] A, C^1, D^1, G ; तु मध्ये तु C^2, तन्मध्ये F ; 47d कुम्भलतां] Eds., कुम्भतलां A, D, कुम्भतलं C, F, कुम्भदलं G.

४. F^1 et F^2 donnent cette version de 48ab : सप्तांशं स्यात्तदूर्ध्वे तु कूटविस्तारमेकतः।

५. 48d तद्द्व्यंशं कोष्ठकायतम्] C, तद्वयं कोष्ठकायुतम् A, G, अर्धकोष्ठकायतम् D^1, अर्द्धं(?) कोष्ठकायतम् D^2, द्व्यंशभ्यां कोष्ठकायतम् F.

६. F^1 et F^2 donnent cette version de 49ab : तस्योर्ध्वे भूमिपञ्चाङ्गं षड्भागैस्तद्विभाजयेत्।

७. 50a हारं कर्तव्य॰] C^2, G, हाराकर्तव्या A, C^1, हारकर्तव्या D, F ; 50b ॰मर्धं] Eds., सार्धम् A(etc.).

८. 51a कूटे कूटे चतुर्नासी] A^2, C, D, G, कूटकूटे चतुर्नासी A^1, कूटे तु नस्यविस्तारं F.

९. 51d कपोते द्वे तु नासिके] C^2, कपोते द्वौ तु नासिका A, C^1, D, G, कपोताङ्गे तु नासिका F^1, कपोतौ द्वौ तु नासिका F^2.

१०. 52b विनासिकम्] A(etc.), द्विनासिकम् F.

११. 53d कूटकोष्ठं] A(etc.), कूटकोट्यां F.

[५.३. उन्मानम्]

विमानोत्सेधं विभजेत्पञ्चाशद्भागया सह[१] ॥ ५४ ॥
[२]त्रिभागार्धमधिष्ठानं सप्तांशं पाददैर्घ्यकम्।
प्रस्तरोच्चं त्रिभागार्धं षडर्धं स्तम्भदैर्घ्यकम्[३] ॥ ५५ ॥
पादाधिकत्रयंशेन ऊर्ध्वमञ्चं प्रकल्पयेत्[४] ।
षडंशं चोर्ध्वपादं तु त्रिभागं प्रस्तरोन्नतम्[५] ॥ ५६ ॥
पञ्चभागार्धमुत्सेधमूर्ध्वभूमौ तु पादकम्।
द्विभागं प्रस्तरोत्सेधमंशेन वेदिकोच्छ्रयम्[६] ॥ ५७ ॥
द्व्यंशं स्यात्तु गलोत्सेधं पञ्चांशं शिखरोन्नतम्[७] ।
शेषं तत्र शिखामानं चतुर्भूमौ विशेषतः ॥ ५८ ॥

[५.४. पुनर्विविधलक्षणम्]

[८]चतुरश्रमधिष्ठानं शालाकूटं तु निर्गमम्।
शिखरं चतुरश्रं स्याच्चतुर्नासिभिरन्वितम्॥ ५९ ॥
कूटैर्द्वादशभिर्युक्तं कोष्ठैर्द्वादशभिर्युतम्[९] ।
पञ्जरैः षोडशैर्युक्तं लम्बनासि तथाष्टकम्[१०] ॥ ६० ॥
द्विरष्टकुम्भलतायुक्तं भद्रद्वादशभिर्युतम्।
द्वितलं चाल्पनासी स्यादावृतं तु कपोतके[११] ॥ ६१ ॥
प्रासादमेतन्नाम्ना तु श्रीप्रतिष्ठितमुच्यते।

---

१. 54d पञ्चाशद्भागया सह] A, D, G, पञ्चांशे तु परिक्षयेत् C, पञ्चाशद्भागया बुधः F.

२. C^2 omet 55ab-55cd.

३. 55d षडर्धं स्तम्भदैर्घ्यकम्] A, C^1, D, षट्स्तम्भं तस्य दैर्घिकम् G.

४. 56a °धिकत्रयंशेन] A^1, G, °धिकत्रियंशेन A^2, D^2, °धिकं च त्र्यंशेन C, lacune, D^1, °धिकत्रिभगेन F ; 56b ऊर्ध्वमञ्चं] A(etc.), प्रस्तरं च F.

५. 56d त्रिभागं] A, D, F, G, द्विभागं C.

६. 57c द्विभागं] A^1, द्विभागार्धं (*v.f.*) A^2, C, D, G ; 57d °मंशेन वेदिकोच्छ्रयम्] A^2, D, G, °मंशेना वेदिकोच्छ्रयम् A^1, lacune C^1, पञ्चांशं शिखरं भवेत् C^2.

७. 58a द्व्यंशं] A, C^1, D, G, द्विधांशं C^2 ; 58b पञ्चांशं] A^2(etc.), पञ्चांश° A^1, D^2.

८. F^1 et F^2 omettent 59ab-78ab (?).

९. 60a कूटैर्द्वादशभिर्युक्तं] A^2, C^1, D, G, कूटैर्द्वादभिर्युक्तं (*v.f.*) A^1, कूटैर्द्वादभियुक्तं (*v.f.*) C^2 ; 60b द्वादश°] A, C^1, D, G, वा दश° C^2.

१०. 60d लम्बनासि तथाष्टकम्] A^1, लम्बनासी तथांशकम् A^2, G, लम्बमानं तथाष्टकम् C, लम्बना च तथांशकम् D^1, लम्बना तथाष्टकम् D^2.

११. 61c चाल्पनासी स्याद्] A, D^1, G, चाल्पनासीभ्याम् C, D^2.

[६. द्वितीयं श्रीप्रतिष्ठितम्]

[६.१. विस्तारः]

पञ्चदशकरं तारं पादोनद्विगुणोच्छ्रयम्[१] ॥ ६२ ॥
गर्भगेहं चतुर्भागं द्विभागं भित्तिविस्तरम्।
सालिन्दमंशमंशेन खण्डहर्म्यं तु कारयेत्[२] ॥ ६३ ॥
[३]अंशेन कूटविस्तारं द्व्यंशे कोष्ठायतं भवेत्।
अंशेन पञ्जरं कुर्यादंशे हारं प्रकल्पयेत्॥ ६४ ॥
ऊर्ध्वभूमिस्तु षड्भागं तत्सर्वं चाष्टभागिकम्।
भागया कूटविस्तारमंशे हारं प्रकल्पयेत्[४] ॥ ६५ ॥
शालायामद्विभागाभ्यामंशेन पञ्जरं भवेत्।
ऊर्ध्वभूमिश्चतुर्भागं षड्भागेनैव भाजयेत्[५] ॥ ६६ ॥
एकांशं कूटविस्तारं द्व्यंशं कोष्ठायतं भवेत्।
हारान्तरं तु भागेन कुर्यादूर्ध्वे त्रिभागिकम्[६] ॥ ६७ ॥

[६.२. उन्मानम्]

प्रासादोत्सेधमानं तु पञ्चाशद्भागया भजेत्[७] ।
अर्धाधिकत्रिभागेन मसूरं तु प्रकल्पयेत्॥ ६८ ॥
सप्तांशं पाददैर्घ्यं तु प्रस्तरोच्चं त्रिभागया।
षडर्धं स्तम्भदैर्घ्यं तु मञ्चं वह्निं सपादकम्[८] ॥ ६९ ॥
षडंशं चोर्ध्वपादं तु त्रिभागं प्रस्तरोन्नतम्।
पञ्चभागार्धमुत्सेधमूर्ध्वभूमौ तु पादकम्[९] ॥ ७० ॥

---

१. 61c पञ्चदश°] Eds., पञ्चादश° A^1(etc.).

२. 63d खण्डहर्म्यं तु] C, D, खण्डहर्म्येन A, G.

३. C^1 et C^2 ajoutent entre 63cd et 64ab : शालायामद्विभागाभ्यामंशेन पञ्जरं भवेत्। ऊर्ध्वभूमिश्चतुर्भागं षड्भागेनैव भाजयेत्॥

४. 65d °मंशे हारं] D^1, शेषं हारं A, G, शेषाभारं C, द्व्यंशे भारं D^2.

५. 66d भाजयेत्] C, D, भाजनम् A, G.

६. 67c हारान्तरं] A, भागान्तरं C, भारान्तरम् D, एकान्तरं G ; 67d ऊर्ध्वे त्रिभागिकम्] Eds., ऊर्ध्वे त्रिभूमिकम् A, D^2, G, ऊर्ध्वत्रिभूषितम् C^1, ऊर्ध्वं त्रिभूषितम् C^2, D^1.

७. 68a °त्सेधमानं] A, D^2, G, lacune C^1, °त्सेधमंशं C^2, °त्सेधमंशेन D^1.

८. 69c स्तम्भदैर्घ्यं तु] A^2, C, D, G, संभवे दैर्घ्यं A^1 ; 69d मञ्चं वह्निं सपादकम्] C, D, मञ्चं वह्निं च पादकम् A, प्रस्तरं वह्निपादकम् G.

९. 70d तु पादकम्] Eds., तु पट्टिका A, lacune C, G, गपादिकम् (?) D.

पादोनं तु त्रिभागेन प्रस्तरोच्चं विधीयते[१] ।
अंशेन वेदिकोत्सेधं द्वयंशं तु गलोन्नतम्॥ ७१ ॥
पञ्चांशं शिखरोच्चं स्याच्छेषभागैः शिखा भवेत्।

[६.३. विविधलक्षणम्]

[२]चतुरश्रमधिष्ठानमष्टाश्रं शिखरं भवेत्[३] ॥ ७२ ॥
अधिष्ठानसमं सूत्रमन्तरालं तु निम्नगम्।
महानासी चतस्रं स्यात्पञ्चनासी चतस्रकम्॥ ७३ ॥
वेदिकागलमष्टाश्रं पञ्चरैः षोडशैर्युतम्।
सभा द्वादश एवं स्यात्कोष्ठं तत्र तथैव च॥ ७४ ॥
शतमष्टाधिकं षष्ट्या चाल्पनासीभिरन्वितम्[४] ।
तोरणत्रयसंयुक्तमष्टजालकसंयुतम्[५] ॥ ७५ ॥
सर्वलक्षणसंयुक्तं प्रासादं श्रीप्रतिष्ठितम्।

[७. विष्णुच्छन्दम्]

[७.१. विस्तरः]

सप्तदशं तु विस्तारमध्यर्धं तस्य तुङ्गकम्[६] ॥ ७६ ॥
प्रासादस्य तु विस्तारं भाजयेत्तु त्रयोदशम्।
[७]गर्भगेहं नवांशं स्यात्त्रयंशं भित्तिविस्तरम्[८] ॥ ७७ ॥
सालिन्दं परितः कुर्यादंशेनांशेन हर्म्यकम्।
[९]सौष्ठिकं स्यात्तथांशेन द्व्यंशं शालायतं भवेत्[१०] ॥ ७८ ॥

---

१. 71a पादोनं तु] Eds., भागेन तु A, भागोन्नं तु C^1, भागोन्नतं C^2, तागोनं तु D^1, भागोनं तु D^2, G.

२. A^2 omet 72cd.

३. 72c चतुरश्रम्] A^1, D, G, lacune C^1, चतुर्भागम् C^2.

४. 75a अष्टाधिकं॰] G, अष्टाधिका॰ A, अष्टाधिकं षष्टिरल्प C, D.

५. 75d अष्टजालकसंयुतम्] Eds., अष्टकालकसंयुतम् A, G, ष +मालकसमन्वितम् C, षम्मालकसमन्वितम् D.

६. 76c सप्तदशं तु विस्तारं] C^2, सप्तांशं रविहस्तारं A^1, सप्तांशं तस्य विस्तारं A^2, lacune C^1, सप्तदशाविस्तारं D, सप्तांशं हस्तिविस्तारं G ; 76d ॰ध्यर्धं] D, ॰ध्यमं A^1, C.

७. 9.77cd très proche de 9.44ab.

८. 77c नवांशं स्यात्] A, D, G, नवांशेन C ; 77d त्रयंशं] A^1, G, त्र्यंशं (*v.f.*) A^2, स्यादत्यंशं C^1, स्यादंशं C^2, अत्यंशं D (?).

९. A^1 omet 78cd-79cd ; F^1 et F^2 reprennent à 79cd.

१०. 78c सौष्ठिकं] A^1, D, G, सौष्टनं A^2, lacune C^1, सौराष्ट्रं C^2 ; 78d शालायतं] Eds., नालायतं A, G, नीलायतं C, D.

त्रयंशं कोष्ठकायोग्यं हारायामं तथांशकम्[१] ।
ऊर्ध्वभूमिर्नवांशं स्यादंशेन कूटविस्तरम्[२] ॥ ७९ ॥
[३]त्रयंशं कोष्ठकायामं द्व्यंशं हारायतं भवेत्[४] ।
[५]हारमध्ये तु भागे तु पञ्जरं कल्पयेद्बुधः[६] ॥ ८० ॥
तदूर्ध्वे भूमिसप्तांशं कूटं पूर्ववदिष्यते[७] ।
एकांशं कोष्ठकायाममंशं हारायतं भवेत्॥ ८१ ॥
हारामध्ये विशेषेण लम्बपञ्जरमेव हि[८] ।
तदूर्ध्वभूमिपञ्चांशं नवत्र्यंशेन भाजितम्[९] ॥ ८२ ॥
तन्मध्ये दण्डनीव्रं स्यान्महाशालाबहिर्गतम्[१०] ।

[७.२. कूटादिलक्षणम्]

द्विदण्डं वा त्रिदण्डं वा कोष्ठकानां तु नीव्रकम्॥ ८३ ॥
हाराणामन्तरे कुर्यादावृतं तोरणं क्रमात्[११] ।
उन्नतं तु महाशाला कपोतं तच्छिखान्तकम्[१२] ॥ ८४ ॥
अन्तरे प्रस्तरं कुर्यादनुनासीभिरन्वितम्।
कूटनिम्नोन्नतं तत्र उत्तरे तु शिखान्तकम्[१३] ॥ ८५ ॥

---

१. 79b हारायामं] A, D, G, द्वारमंशं C^1, हारमंशं C^2.

२. 79c °दंशेन कूटविस्तरम्] A, G, °दंशकूटप्रविस्तरम् C, °दंशं स्यात्कूटविस्तरम् D^1, °दंशकूटविस्तरम् D^2, °त्कूटविस्तारमंशकम् F.

३. F^1 et F^2 donnent cette version de 80 : कोष्ठकायामं त्रिभिर्भागैः बाह्यो हारायतं भवेत्। हारामध्ये तु भागेन पञ्जराणि प्रकल्पयेत्॥

४. 80b द्व्यंशं हारायतं भवेत्] Eds., द्वियंशं हारायतं (*v.f.*) A^1, G, lacune A^2, द्विंशधारादयं भवेत् C^1, द्व्यंशहारादयं भवेत् C^2, अर्धांशं हारायुतं भवेत् D.

५. D^1 omet 80cd-80cd.

६. 80c हारमध्ये तु भागे तु] A^1, हारमध्ये च भागे तु A^2, G, हारमध्यैकभागेन C, हारामध्ये च भागे तु G(var.).

७. 81b कूटं पूर्ववदिष्यते] A^2(etc.), कूटायामं त्रिधांशकं A^1, F^1.

८. 82b लम्बपञ्जरमेव हि] A(etc.), लम्बमानसमाचरेत् F.

९. 82d नवत्र्यंशेन भाजितम्] A, C, D^2, नवत्यंशेन भाजितम्, D^1, त्रिण्यंशेन विभाजयेत् F, नवं त्र्यंशेन भाजितम् G.

१०. 83b महाशालाबहिर्गतम्] A(etc.), महालादिभिर्गर्भता F.

११. 84b क्रमात्] A, C^1, D, G, भवेत् C^2.

१२. 84d कपोतं तच्छिखान्तकम्] A, G, कपोते तच्छिखान्तकम् C^1, D, कपोते तच्छिकान्तकम् C^2, कपोलो तच्छिकान्तकम् F.

१३. 85c कूटनिम्नोन्नतं] F, कूटनीलोत्तरं A(etc.).

ऊर्ध्वभूमौ तु सर्वत्र कूटशालां तथैव च ।
तले तले तु पादानि सप्तभागैर्विभाजयेत्[१] ॥ ८६ ॥
[२]भागमेकमधोवेदिं गलं तदर्धमुन्नतम्[३] ।
अङ्गेन च चतुः कुर्यादंशार्धं शिखरं भवेत्[४] ॥ ८७ ॥
[५]अंशेन तु शिखां कुर्यात्कूटशालातलं प्रति[६] ।

[७.३. विविधलक्षणम्]

नानामसूरकस्तम्भवेदिकातोरणान्वितम्[७] ॥ ८८ ॥
जालकैरष्टभिर्युक्तमादिभूमौ विधीयते[८] ।
चतुरश्रं हि तत्कूटं शिखरं मण्डलं भवेत्[९] ॥ ८९ ॥
[१०]नीडाव्यासार्धविस्तारं विस्तारद्विगुणोन्नतम्[११] ।
तोरणं हारयायुक्तं तदूर्ध्वे तु झषांशकम्[१२] ॥ ९० ॥

[७.४. उन्मानम्]

विमानोत्सेधमानं तु षष्टिभागेन भाजयेत्[१३] ।
चतुर्भागं तलोत्सेधं द्विगुणं स्तम्भदैर्घिकम्॥ ९१ ॥
प्रस्तरं तलवत्तुङ्गं सप्तार्धं चोर्ध्वपादकम्[१४] ।

---

१. 86c तले तले] A(etc.), तलैः तस्य F ; 86d °भागै°] A, C[1], F, G, °पादै° C[2], D.

२. F[1] et F[2] donnent cette version de 87ab-88ab : भागमेकमथो वेदिदलमध्यर्धमुन्नतम्। अंशे तु वलभिः कुर्याद् द्व्यंशार्धं शिखरं भवेत्॥ अंशेन शिखरं कुर्यात्कुर्याद्भूमौ विशेषतः।

३. 87a भागं] Eds., पादं A(etc.). ; 87b तदर्धम्] G, तत्यर्थम् A, तत्यर्धम् C, D.

४. 87c अङ्गेन च चतुः] A[1], अंशेन च चतुः A[2], अंशेन चतुर्भिः C, D, अंशेन चतुरः G ; 87d °दंशार्धं] A, द्व्यंशार्धं C, D, G.

५. A[2] omet 88-89.

६. 88a अंशेन तु शिखां] C, D, अंशे तु शिखरं A[1], G.

७. 88d तोरणान्वितम्] Eds., तयतान्वितम् A[1], D, G, lacune C[1], त्रिभिरन्वितम् C[2], पादायनान्वितम्(?) F.

८. 89b विधीयते] A(etc.), विशेषतः F.

९. 89d मण्डलं] A[1], D, G, मण्डपं C.

१०. F[1] et F[2] omettent 90 et donnent cette version de 91ab-92ab : विमानोत्सेधतत्सर्वं षष्ठिभागेन योजयेत्। चतुर्भागमधिष्ठानं द्विगुणं स्तम्भदैर्घ्यकम्॥ प्रस्तराभिश्चतुर्भागं सप्तार्धं चोर्ध्वमञ्चकम्॥

११. 90a नीडाव्या°] Eds., नीलभ्या° A, नीलव्या° C, D, G.

१२. 90c तोरणं हारया°] Eds., तोरणाहारया° A, G, तोरणाहारणा° C, D.

१३. 91a षष्टिभागेन] D[1], षष्ट्यभागेन A[1], G, षष्ठभागेन A[2], C, षष्ठिभागेन D[2].

१४. 92a तलवत्तुङ्गं] A[2], C, D, G, तलवृत्तुंगं A[1] ; 92b °पादकम्] Eds., °वेदिका A(etc.).

[1]पादाधिकत्रयंशेन मञ्चोच्चं तु प्रकल्पयेत्[2] ॥ ९२ ॥

[3][Lacune]

ऊर्ध्वस्तम्भं षडंशेन तदर्धं प्रस्तरोन्नतम्।
द्व्यंशेन वेदिकां कुर्यात्त्रयंशेन गलोन्नतम्॥ ९३ ॥
शिखरं षडंशकेनैव शेषमानं शिखा भवेत्।

[७.५. पुनर्विविधलक्षणम्]

चतुरश्रमधिष्ठानं शालामध्ये तु निर्गमम्॥ ९४ ॥
[4]शेषं सर्वं समं सूत्रं गर्भगेहं सुवृत्तकम्।
कूटैर्द्वादशभिर्युक्तं नीडान्यष्टौ प्रकल्पयेत्॥ ९५ ॥
कोष्ठैर्द्वादशभिर्युक्तं पञ्चतोरणसंयुतम्[5] ।
जालकैरष्टभिर्युक्तं पञ्जरैः षोडशैर्युतम्॥ ९६ ॥
चत्वारीह महानासी विष्णुच्छन्दमिति स्मृतम्[6] ।

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चतुर्भूमिपटलो नवमः[7] ॥

---

१. F^1 et F^2 omettent 92cd-93ab et donnent cette version de 93cd-94cd : द्व्यंशेन वेदिकां कुर्यात्त्रिभिरङ्गैर्गलोन्नतम्। शिखरं षष्ठिरङ्गैः स्यात्स्थूपिकांशेन भागया॥ चतुरश्रम् अधिष्ठानं शालामध्ये तु निर्गतिः॥

२. 92d मञ्चोच्चं] C, मञ्चोर्ध्वं A, D, G.

३. Lacune générale correspondant à la description d'un palier.

४. F^1 et F^2 omettent 95ab et donnent cette version de 95cd-97ab : कूटैर्द्वादशभिर्युक्तं कोष्ठैरपि समन्वितम्॥ पञ्चतोरणसंयुक्तमष्टभिर्नीडसंयुतम्। जालाभिकैर्(?) अष्टभिर्युक्तं स्वरपञ्जरान्वितम्॥ विष्णुच्छन्दमिदं हर्म्यं सर्वदेवार्हणं विदुः। चतुस्तलमिदं प्रोक्तं शृणु पञ्चतलं विदुः।

५. 96b पञ्चतोरण°] A, G, पञ्चतोरण° C, D.

६. 97a चत्वारीह] A^2, C, D^1, G, चत्वारिंश A^1, D^2 ; 97b विष्णुच्छन्दम्] A^2, C, G, द्विष्णुच्छदम् A^1, D.

७. A^2, D, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चतुर्भूमिपटलो दशमः ; C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चतुर्भूमिलक्षणविधिः नवमः पटलः ; F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां चतुर्थभूमिपटलो दशमः ; F^2 : इति दीप्तशास्त्रे चतुर्थभूमिः पटलः दशमः।

[दशमः पटलः]
[मण्डपलक्षणविधिः][1]

अतः परं प्रवक्ष्यामि मण्डपानां तु लक्षणम्।

[१. विषयानुक्रमणिका]

[2]देवालयाग्रे कर्तव्यं मण्डपं लक्षणान्वितम्॥ १ ॥
नामपादप्रमाणं च भक्त्यायामं विशेषतः[3] ।
पादसङ्ख्याविधानं च कुट्टिमं त्वथ गर्भकम्[4] ॥ २ ॥
प्रथमं स्तम्भकुड्यं च स्थापनं प्रथमेष्टका[5] ।
कायानुकायसोपानं महाद्वारस्य लक्षणम्॥ ३ ॥
तत्सर्वं तु प्रवक्ष्यामि शृणु त्वं हि महानल[6] ।

[२. मण्डपनामानि]

[7]तेषां मण्डपनामानि प्रवक्ष्यामि समासतः[8] ॥ ४ ॥
श्रीभद्रं श्रीविशालं च श्रीभोगं च ततः परम्[9] ।
[10]श्रीकरं चाथ श्रीकूटं तच्छ्रीकण्ठमिति स्मृतम्[11] ॥ ५ ॥
पुष्करं विजयं चैव भूभद्रं भद्रशोभितम्[12] ।

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. C^1 : lacune 1d-2a.

३. 2a नामपादप्रमाणं] C^2, F, नादं पादप्रमाणं A, G, गामं पादप्रमाणं D^1, नामं पादप्रमाणं D^2 ; 2b भक्त्यायामं] Eds., भक्तायाम A, भक्तायामं C^2, D, G, पङ्क्त्यायामं F^1, पद्मायामं F^2.

४. 2c °विधानं] A(etc.), °प्रमाणं F ; 2d त्वथ] C, D, चाश A, चेथ F^1, चाथ F^2, चांश G.

५. 3a प्रथमं स्तम्भकुड्यं] C^1, F, प्रथमं स्तम्भकटचं A, D^2, G, प्रथमस्तम्भकुट्टिं च C^2, प्रथमं स्तम्भकूटं D^1.

६. 4a तु प्रवक्ष्यामि] A, F, संप्रवक्ष्यामि C, D, G ; 4b महानल] A, D, F^2, G, महालयम् C, मलावला F^1.

७. F^2 omet 4cd-6ab.

८. 4c तेषां] A(etc.), तानि F^1.

९. 5a श्रीविशालं] A, C^1, D, F^1, G, श्रीशालं (*v.f.*) C^2.

१०. C^1 : lacune 5d-6a.

११. 5c श्रीकरं] A, D^2, G, ही नभागं (?) C^1, श्रीभोगं C^2, श्रीकण्ठम् D^1 ; 5d तच्छ्रीकण्ठमिति स्मृतम्] A(etc.), श्रीकण्ठ इति संस्मृतम् F^1.

१२. 6a पुष्करं] A(etc.), पौष्करं C^2, lire peut-être पुष्कलं (cf. 20cd) ; 6b भूभद्रं भद्रशोभितम्] A(etc.), भुजपत्रप्रशोभितम् F^1.

कैलासं केसरं चैव पर्वतं पर्वतोमुखम्[१] ।।६ ॥
एतत्तु कथितं नाम धनधान्यप्रदायकम्[२] ।

[३. मण्डपस्तम्भलक्षणम्]

[३.१. पादमानानि]

सर्वेषां पादमानानि वक्ष्यन्ते विधिनाधुना[३] ॥ ७ ॥
द्विहस्तार्धं समारभ्य चतुर्हस्तान्तमेव च[४] ।
षडङ्गुलविवृद्ध्या तु स्तम्भाः सप्तविधोच्छ्रयाः[५] ॥ ८ ॥
[६]सर्वपादस्य चोत्सेधं षड्भ्यष्टांशभाजितम्[७] ।
तत्पादविस्तरं ज्ञेयं तत्तद्भागवशेन तु[८] ॥ ९ ॥
[९]दारुस्तम्भविशालार्धं त्रिभागं द्वयमेव च।
चतुर्भागेन चैवं स्याद्भित्तिपादस्य विस्तरम्[१०] ॥ १० ॥
अथवा पादविष्कम्भं वक्ष्यते विधिनाधुना।
[११]स्तम्भविष्कम्भमानं यत्षड्भ्यष्टाङ्गुलं भवेत्॥ ११ ॥
एकैकं त्रित्रिभेदं स्यादङ्गुलाङ्गुलवृद्धिकम्[१२] ।

[३.२. भक्तिमानम्]

द्विहस्तं च द्विहस्तार्धं त्रिहस्तं सार्धहस्तकम्[१३] ॥ १२ ॥
चतुर्हस्तं च सार्धं च भक्त्यायामं च षड्विधम्[१४] ।

---

१. 6d पर्वतोमुखम्] A(etc.), चाप्यधोमुखम् C^2.

२. 7b धनधान्यप्रदायकम्] A(etc.), भुक्तिमुक्तिप्रदायतः F.

३. 7c पादमानानि] Eds., पदनामानि A, पादनामानि C, D^1, F^2, G, वाननामानि D^2.

४. 8b चतुर्हस्तान्तमेव च] A(etc.), तत्षडास्तान्तमेव च F.

५. 8d स्तम्भाः सप्तविधोच्छ्रयाः] C^1, D, स्तम्भा सप्तविधोच्छ्रयम् A, G, स्तम्भाः सप्तविधोच्छ्रयम् C^2, स्तम्भाः पञ्चदशोच्छ्रयाः F.

६. C^1 : lacune 9b-10ab.

७. 9a सर्व॰] A, D^1, G, यस्य C, D^2, तस्य F.

८. 9c तत्पादविस्तारं ज्ञेयं] A, C^2, G, अपादविस्तारं ज्ञेयं D, तत्तत्पादस्य विस्तारं F ; 9d तत्तद्] D^1, तदा A^1, G, तद A^2, C^2, नद D^2, तथा F.

९. C^2 : lacune 10b.

१०. 10c भागेन चैवं स्याद्] C^2, भागेनमेवं स्याद् A, D^2, F^1, G, भागोनमेवं स्याद् C^1, भागेन वा ह्येवं D^1, भागेन एवं स्यात् F^2 ; 10d भित्तिपादस्य] A^2, C, D, F, G, भित्तिपादसु॰ A^1.

११. F^1 et F^2 donnent cette version de 11cd : षड्भ्यष्टाङ्गुलं तत्र स्तम्भविष्कम्भमानकम्।

१२. 12a त्रित्रिभेदं] A, C^1, D, F^2, G, त्रित्रिभोगं C^2, तत्त्रिभेदं F^1.

१३. 12d सार्धहस्तकम्] A, C^2, D, G, स्यार्धहस्तकम् C^1, चार्धकं भवेत् F.

१४. 13b भक्त्यायामं] A, C^1, D, भित्त्यायामं C^2, प्रत्यङ्गामं च F^2, प्रत्ययामं F^1, भक्तायामं

[३.३. स्तम्भभेदाः]

अथवा क्षेत्रपादानामाकृतिं च विशेषतः॥ १३ ॥
चतुरश्रमथाष्टाश्रं षोडशाश्रं तु वृत्तकम्[१] ।
मूलाग्रं पिण्डपादं स्यान्मध्येऽष्टाश्रमथापि वा[२] ॥ १४ ॥
[३]कुम्भमण्डियुतं वापि कुम्भयुक्तमथापि वा[४] ।
[५]पोतिकासहितं वापि नानालङ्कारसंयुतम्[६] ॥ १५ ॥
[७]उत्तरादीह वृत्यन्तं प्रासादवदितीष्यते[८] ।
[९]दण्डिकामुष्टिबन्धं च मतलावृतभूषणम्[१०] ॥ १६ ॥
सिंहव्यालाङ्घ्रिकं वापि नाटकाभिरलङ्कृतम्[११] ।

[३.४. मण्डपानां पादसङ्ख्या]

सर्वेषां मण्डपानां तु पादसङ्ख्या विधीयते॥ १७ ॥
श्रीभद्रं च चतुष्पादं श्रीविशालं नवाङ्घ्रिकम्[१२] ।
षोडशस्तम्भसंयुक्तं श्रीभोगमिति कीर्तितम्॥ १८ ॥
पञ्चविंशतिभिः पादैरन्वितं श्रीकरं परम्[१३] ।
षट्त्रिंशत्पादसंयुक्तं श्रीकूटमिति चोच्यते॥ १९ ॥

G ; षड्विधम्] A(etc.), षट्स्वयम् G.

१. 14b तु वृत्तकम्] A, C^1, G, lacune C^2, तु विस्तृतम् D, च वृत्तकम् F.

२. 14c मूलाग्रं पिण्डपादं] Eds., मूलाश्रं पिण्डपादं A, G, +++ पिण्डिपादं C, मूलाश्रं पिण्डिपादं D, F^1, मूलाग्रमपि श्रीपादं F^2.

३. 10.15ab-cd = 12.43ab-cd.

४. 15b कुम्भयुक्तं] A^1(etc.), कुम्भयुग्मम् F.

५. F^1 et F^2 intercalent un demi-vers (=15c+15b) entre 15ab et 15cd : बोधिका संहितं वाऽपि कुम्भयुग्ममथापि वा।

६. 15c पोतिका॰] C, D, वेदिका॰ A, G, बोधिका॰ F.

७. F^1 et F^2 donnent cette version de 16ab : प्रस्तारान्तमुपानादि प्रासादावधिरिष्यते।

८. 16a उत्तरादीह वृत्यन्तं] A^1, G, उत्तरादीभवृत्यन्त A^2, उत्तरादेह वृत्यन्तं C, D ; 16b प्रासादवदितीष्यते] Eds., प्रासादपदिनिष्यते A, प्रासादवदतीष्यते C^1, प्रासादवदिष्यते (*v.f.*) C^2, प्रासादवतीष्यते D, प्रासादवतिनिष्यते G.

९. F^1 omet 16cd-17cd.

१०. 16d मतलावृतभूषणम्] A^1(etc.), मालाभिर्वै विभूषितम् F^2.

११. 17a सिंहव्याला॰] A^1(etc.), हंसव्याला॰ F^2.

१२. 18b श्रीविशालं नवाङ्घ्रिकम्] F, G, विशालं नवाङ्घ्रिकम् (*v.f.*) A, श्रीविशालं तदङ्घ्रिकम् C, श्रीविशालं तथाङ्घ्रिकम् D.

१३. 19a पञ्चविंशतिभिः] A, F, G, पञ्चभिः पञ्चभिः C, D.

[१]पादेनैकोनपञ्चाशद्युक्तं श्रीकण्ठमिष्यते[२] ।
पादैरष्टाष्टभिर्युक्तं पुष्कलं तत्प्रकीर्तितम्[३] ॥ २० ॥
एकाशीतिपदैर्युक्तं विजयं तत्प्रकीर्तितम्[४] ।
[५]शतपादसमायुक्तं जयभद्रमिति स्मृतम्[६] ॥ २१ ॥
एकविंशच्छताङ्घ्रिभिरन्वितं भद्रशोभितम्।
चत्वारिंशच्चतुर्युक्तशतपादैरलङ्कृतम्॥ २२ ॥
एतत्कैलासमित्युक्तं केसरं च ततः शृणु[७] ।
[८]एकोनसप्तति युक्तं शतपादं विशेषतः॥ २३ ॥
शतं षण्णवति प्रोक्तं पर्वतं पादसङ्ख्यया।
द्विशतं पञ्चविंशद्भिर्निर्युक्तं पर्वतोमुखम्॥ २४ ॥
चतुरश्रमिदं प्रोक्तमेषामायतकं शृणु[९] ।

[३.५. मण्डपानां विशेषाः पादसाङ्ख्याश्च]

[१०]मध्यस्तम्भं त्यजेत्तत्र सदालङ्कारकामिना॥ २५ ॥
श्रीविशालस्य तन्मध्ये पादैकं तु परित्यजेत्।
[११]एकपादविहीनं स्याच्छ्रीकरस्य च मध्यमे[१२] ॥ २६ ॥
[१३]वेदाङ्घ्रिं मध्यमे त्यक्त्वा श्रीकूटे तु विशेषतः।

---

१. F^1 et F^2 omettent 20ab-21ab.

२. 20a पादेनैकोनपञ्चाशद्यु°] A, G, पादेनोन्नतपञ्चाशद्यु° C^1, D, पादोन्नतं तु पञ्चांशेद्यु° C^2.

३. 20c अष्टाष्टभि°] A, G, अष्टादिभि° C, D^2, अष्टादिता° D^1 ; 20d पुष्कलं] A, G, पुष्पलं C^2, D.

४. 21b विजयं तत्प्रकीर्तितम्] A, D, G, शतपादैरलङ्कृतम् C.

५. C^2 omet 21cd-22cd.

६. 21d जयभद्र°] A^1(etc.), भूर्जपत्र° F; lire भूभद्र° (*v.f.*) ? cf.6ab.

७. 23b केसरं] A(etc.), असेरं C.

८. A^2 omet 23cd-25ab.

९. 25b आयतकं] D^1, आयां ततः A^1, G, आयमत C^1, आयामतः C^2, आयतं D^2, आयतनं F.

१०. F^1 et F^2 intercalent entre 25ab et 25cd le demi-vers 32ab suivi de : षड्भाष्टकैः पङ्क्तिः वायतार्धं प्रकल्पयेत्। आयतस्य तु तन्मध्ये युक्त्या पादं परित्यजेत्॥ et donnent cette version de 25cd: मध्यस्तम्भादि सन्त्यज्य सदलङ्कारसंयुता।

११. D^2 omet 26d-28a.

१२. 26d °च्छ्रीकरस्य च] A, G, °च्छिखरस्य च C, D^1, °द्भूर्जपत्रस्य F^2.

१३. D^2 omet 27ab à 29cd ; F^2 omet 27ab à 29ab.

[1]श्रीकण्ठस्य तु तन्मध्ये पादमेकं परित्यजेत्॥ २७ ॥
[2]चतुरङ्घ्रिविहीनं स्यात्पुष्करस्य तु मध्यमे[3] ।
विजयस्य तु तन्मध्ये पादमेकं परित्यजेत्॥ २८ ॥
[4]चतुरङ्घ्रिविहीनं स्याज्जयभद्रस्य मध्यमे।
भद्रशोभितमध्ये तु पादमेकं विहीनकम्[5] ॥ २९ ॥
[6]तन्मध्ये तु चतुष्पादं त्यजेत्कैलासमण्डपे।
केसरस्य तु तन्मध्ये ह्रासयेदेकमङ्घ्रिकम्[7] ॥ ३० ॥
पर्वतस्य तु तन्मध्ये चतुष्पादं परित्यजेत्।
पर्वतोमुखमध्ये तु पादमेकं परित्यजेत्॥ ३१ ॥
तत्तत्पूर्वे द्विभित्तिश्च त्रिभित्तिश्चैकभित्तिकम्[8] ।

[३.६. आयतमण्डपानां विशेषः]

आयतार्धविवृद्धिः स्यादङ्घ्रिकैरधिकं भवेत्[9] ॥ ३२ ॥

[४. मण्डपानां विविधलक्षणम्]

[४.१. अधिष्ठानम्]

हर्म्याधिष्ठानमानं वा नवाष्टांशैकहीनकम्[10] ।
अधिष्ठानस्य चोत्सेधं मण्डपानां प्रशस्यते॥ ३३ ॥

---

१. A[1] omet 27cd-28cd.

२. C[2] omet 28ab-28cd.

३. 28a चतुरङ्घ्रि°] A[2], D[1], वरणाङ्घ्रि° C[1].

४. G intercale la fin du chapitre 6 et le début du chapitre 7 entre 28cd et 29ab.

५. 29d पादमेकं विहीनकम्] A, D, पादमेकं परित्यजेत् C, G, गृहपादं परित्यजेत् F[2].

६. C, G omettent 30ab-31cd ; F[1] et F[2] donnent cette version de 30ab-32cd :
तन्मध्ये षोडशं पादं त्यजेत्कैलासमण्डपे। केसरस्य तु तन्मध्ये ग्रासयेद्पञ्चविंशतिः ॥
पर्वतस्य तु तन्मध्ये षोडशं तु परित्यजेत्। पर्वतोमुखमध्ये तु पञ्चविंशत्परित्यजेत्॥
तत्तत्पूर्वे द्विपङ्क्तीति त्रिपङ्क्ती पञ्चपङ्क्तिका। विस्तारद्विगुणं धीमानायातार्धं परित्यजेत्॥

७. 30d ह्रासयेद्] A[1], D, प्रासयेद् A[2].

८. 32a तत्तत्पूर्वं द्विभित्तिश्च] A, तत्तत्पूर्वे द्विभक्तिश्च C, D, G ; 32b त्रिभित्तिश्चैकभित्तिकम्] A, त्रिभक्तिश्चैकभक्तिकम् C, D, G.

९. 32c विवृद्धिः] A, C[1], प्रवृत्तिस् C[2], प्रवृद्धिः D, G.

१०. 33a °मानं वा] A, F, °मावान C, G, lacune D ; 33b नवाष्टांशैकहीनकम्] A, F[2], नवाष्टांशै +हीनकम् C[1], वाष्टाष्टांशैकहीनकम् C[2], G, नवाष्टाष्टांशैकहीनकम् D, नवाष्टत्रिंशद्धीनकम् F[1].

[४.२. गर्भस्थानम्]

सर्वेषां मण्डपानां तु गर्भस्थानं प्रवक्ष्यते[१] ।
द्वारदक्षिणकोणे तु यमस्तम्भे तु विन्यसेत्[२] ॥ ३४ ॥
बाह्ये द्विभित्तिपादे वा तत्स्थाने प्रथमेष्टका[३] ।
[४]स्थापयेन्मतिमान्मन्त्री तस्योर्ध्वे स्थाप्य गर्भकम्[५] ॥ ३५ ॥
खातपादे तु होमादौ झषालस्योपरि न्यसेत्[६] ।
तत्स्थाने प्रथमं स्तम्भं स्थापयेत्तु विशेषतः[७] ॥ ३६ ॥

[४.३. कुड्यादि]

अधिष्ठानोपरि न्यस्य समकुड्यं हलाकृतिम्[८] ।
[९]तत्स्तम्भतारत्रिगुणं चत्वारि गुणमेव च[१०] ॥ ३७ ॥
पूर्वे तु दक्षिणे चैव पश्चिमे वा विशेषतः।
उत्तरे दक्षिणे वापि भित्तिं कुर्यात्सलक्षणाम्॥ ३८ ॥
[११]कर्णे कर्णे त्रिभित्तिश्च द्विभित्तिर्वा विभित्तिकः[१२] ।
तदंशं कुट्टिमं भागं मध्ये द्वारं प्रकल्पयेत्॥ ३९ ॥

---

१. 34b प्रवक्ष्यते] A, D, प्रवीक्ष्यते C, G, इहोच्यते F.

२. 34c °कोणे] A^1(etc.), °भागे F ; 34d °स्तम्भे तु] C, D^2, G, °स्तम्भेषु A, F, °स्तम्भेन D^1.

३. 35a बाह्ये द्विभित्ति°] A, बाह्यद्विभक्ति° C, बाह्याभिभक्ति° D^1, बाह्याद्विभक्ति° D^2, G, बाह्यपङ्क्त्यन्तरे F ; 35b तत्स्थाने प्रथमेष्टका] D^1, +++ प्रथमेष्टका A^1 , स्थाने वा प्रथमेष्टका A^2, तत्स्थाने प्रष्ट +मका C, वा तत्स्थाने प्रथमेष्टका D^2, न्यस्त्वा तु प्रथमेष्टका F, + तत्स्थाने व्रजकरम् G.

४. F^1 et F^2 donnent cette version de 35cd : तस्योर्ध्वे तु न्यसेद्गर्भं सर्वसंपत्करं नृणाम्।

५. 35d गर्भकम्] A^2, C, G, मन्त्रकम् A^1, गर्तकम् D.

६. 36a खातपादे तु] A^2, खतपादे तु A^1, F, खातपादेन C^1, खतपादेन C^2, D, G ; 36b झषालस्योपरि] A, राषाडस्योपरि C, D, G, झषा यस्या परि° F.

७. 36d विशेषतः] A^1(etc.), विचक्षणः F.

८. 37b समकुड्यं हलाकृतिम्] D, F, G, समं कुम्भहलाकृतिः A^1, समकुड्यं हलास्तिकम् C^2, समकुड्य ++न्तिकम् C^1 समक्रहलाकृति (?) A^2.

९. D^1 omet 37cd-38cd.

१०. 37c °त्रिगुणं] A^1(etc.), °द्विगुणं F ; 37d °गुणमेव च] A, °गुणमेव वा C, D^2, G, °द्विगुणमेव च F.

११. F^1 et F^2 donnent cette version de 39ab : कर्णे कर्णे त्रिपङ्क्ति स्याद्विपङ्क्तिर्वाथ पङ्क्तिकम्।

१२. 39b द्विभित्तिर्वा विभित्तिकः] A, द्विभक्तिर्विविभक्तिकम् C^1, द्विभक्तिर्द्विभक्तिकम् (*v.f.*) C^2, द्विभक्तिर्वा विभक्तिकम् D, ++++ विभक्तिकम् G.

कायानुकायं सर्वेषां प्रस्तरं हर्म्यवत्कृतम्[१] ।
[२]अजाङ्गणस्य चोर्ध्वे तु सभां सम्यक्प्रकल्पयेत्[३] ॥ ४० ॥

[४.४. सोपानम्]

[४]अधिष्ठानाधिरोहार्थं सोपानं पार्श्वयोर्मुखम्[५] ।
एकभक्तिविनिष्क्रान्तं द्विभक्त्यायतमिष्यते[६] ॥ ४१ ॥
अर्धभक्तिविनिष्क्रान्तं दैर्घ्यं कुर्यात्त्रिभागिकम्[७] ।
हस्तिहस्तेन संयुक्तं सोपानं समखण्डकम्[८] ॥ ४२ ॥

[४.५. आवाराङ्गम्]

अधिष्ठानस्तम्भयुक्तं प्रस्तराभिर्विभूषितम्[९] ।
मण्डपस्य तु तद्बाह्ये भक्त्येकं परिकल्पयेत्[१०] ॥ ४३ ॥
आवारं कल्पयेद्धीमाञ्चतुर्दिक्ष्वथ कल्पयेत्[११] ।
मूलपादोदयार्धं वा त्रिपादं वा तदुच्छ्रयम्[१२] ॥ ४४ ॥
पोतिका चोत्तरं चोर्ध्वं वलयं चोर्ध्ववेशनम्[१३] ।

---

१. 40a कायानुकायं] A, D, F^2, काया तु कयं C^1, G, अल्पानुकाय F^1, कायान्तु कायं C^2 ; 40b प्रस्तरं] A^1(etc.), प्राकारं F.

२. F^1 et F^2 donnent cette version de 40c : अजां कण्ठस्य (F^2 : कर्णस्य) तन्मध्ये ।

३. 40c अजाङ्गणस्य] Eds., अजाङ्गुण सु A, अमाङ्गणस्य C^1, D, G, अमाङ्गुणस्य C^2.

४. 41ab = *Mayamata* 21 96ab ; F^1 et F^2 ajoutent un demi-vers entre 40cd et 41ab : परिव्रतः कल्पयेद्धीमान्द्वारपङ्क्ती तु बाह्यतः ।

५. 41a °रोहार्थं] A^2, C, D, G, °रोहार्धं A^1, °द्वारार्थं F.

६. 41c °भक्ति विनिष्क्रान्तं] C, D^2, G, °भित्ति विनिष्क्रान्तं A, °भक्ति विनिष्कम्भं D^1, °पङ्क्तिविनिष्क्रान्त F ; 41d °भक्त्या°] C, D, G, °भित्त्या° A, °पङ्क्त्या° F.

७. 42a अर्धभक्ति°] Eds., अर्धभित्ति° A, अद्विभक्ति° C, D, G, °द्विपङ्क्तिश् (*v.f.*) F ; 42b °त्रिभागिकम्] C, D, G, °त्रिभित्तिकम् A^1, lacune A^2, °त्रिपादिकम् F.

८. 42c °हस्तेन] Eds., °हस्ते तु A, F^1, °हस्त + C^1, °हस्तौ तु C^2, D, F^2, G ; 42d °खण्डकम्] A(etc.), °खण्डितम् F.

९. 43a °युक्तं] C^2, D, °संयुक्तं (*v.f.*)] A, C^1, F, G ; 43b प्रस्तराभिर्] A, D^1, F, प्रसुराभिर् C^1, D^2, G, प्रसृगा(?)भिर् C^2.

१०. 43d भक्त्येकं] A^1, भित्त्येकं A^2, भक्तैकं C, D^2, भक्त्यैकं D^1, G, पङ्क्त्येकं F.

११. 44a आवारं] SNB., हापारं A^1, महाप +रं A^2, महावारं (*v.f.*) C, D, महाभारं (*v.f.*) F, महापारं (*v.f.*) G.

१२. 44c °पादोदयार्धं] A, D^1, F, G, °पादोदयार्थं C, D^2.

१३. 45a पोतिका] C, D, G, वेदिका A, बोधिका F ; 45b वलयं चोर्ध्ववेशनम्] D, F, द्वयं नोर्ध्वनिवेशनम् A^1, भुवं नोर्ध्वनिवेशनम् A^2, वलयं चोर्ध्व ++++ C^1, चोर्ध्वचोर्ध्वपेशनम् (*v.f.*) C^2, lacune G.

[४.६. छादनम्]

दण्डिकोत्तरयोः स्थाने लूपारोहं प्रकल्पयेत्[१] ॥ ४५ ॥
फलकैर्लोहलोष्टैर्वा मृण्मयैश्छादनं भवेत्[२] ।

[४.७. अलङ्कारादि]

सोपानोर्ध्वाङ्घ्रयः सर्वे हरिस्तम्भं प्रचक्षते[३] ॥ ४६ ॥
सिंहैर्वापि गजैर्वापि व्यालैर्वा भूतकैरपि।
लीलाजनैर्भूषणैश्च भूषयेन्मण्डपं तथा[४] ॥ ४७ ॥
प्रस्तरं सुधया कार्यं महानासीविभूषितम्[५] ।
मण्डपोर्ध्वे प्रकर्तव्यं जलमार्गं चतुर्दिशि॥ ४८ ॥
[६]उक्तमेतद्विधानेन धनधान्यजयप्रदम्[७] ।

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मण्डपलक्षणो नाम दशमः पटलः[८] ॥

---

१. 45c दण्डिकोत्तरयोः] C(etc.), दण्डिकोरन्तरे A ; 45d लूपारोहं] A, व्यापारोहं C, D^2, G, ह्यहारोहं D^1, लोहारोहः F.

२. 46a लोहलोष्टैर्] A, C^1, D^1, G, लोहकोष्टैर् C^2, कुलहलोष्टैर् D^2, लोहलोषैर् F^1, लोहदोषैर् F^2 ; 46b च्छादनं भवेत्] D, F, छदना न्यसेत् A, lacune C^1, व +नं भवेत् C^2, G.

३. 46c सोपानोर्ध्वाङ्घ्रयः सर्वे] A, सोपानोर्ध्वं हि यत्सर्वे C, सोपानोर्ध्व्++यत्सर्वे D, G, सोपानोर्ध्वं क्रियाः सर्वे F.

४. 47c लीलाजनैर्भूषणैश्च] SNB., लीलाजनैषणैश्चैव A^1, लीलाजनैर्भूषणैश्चैव (*v.f.*) A^2, लाजकैर्भूषणैश् C^1, राजकैर्भूषनैश् C^2, विलाजगैर्मृण्णैश् D^1, विलाजगैर्भूषणैश् D^2, विलालदर्पराणैश्च F^1, जीलाजैश्च पुराणैश् F^2, विलाजकैः भूषणैर् G ; 47d तथा] A, ततः C^2(etc.).

५. 48a प्रस्तरं सुधया कार्यं] A, विस्तरं च सुधाकार्यं C, प्रस्तरं स्वधयाकार्यं D^1, प्रस्तरं तु सुधाकार्यं D^2, G, प्रस्तरासु यम्याकाम्या F^1, प्रस्तरं सुयया कार्या F^2 ; 48b महानासी°] A^1, अनुनासी° A^2, C, D, G, चानुनासी° F.

६. F^1 et F^2 remplacent 49ab par : एवं तु मण्डपं प्रोक्तं प्राकारस्य विधिं शृणु।

७. 49a उक्तमेतद्] A^1, उत्तमे तद् A^2, lacune C^1, उत्तमेन C^2, G, उत्तमेनद् D.

८. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मण्डपलक्षणो नाम एकदशतमः ; C, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मण्डपलक्षणविधिः दशमः पटलः ; D : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मण्डपलक्षणपटलैकदशः ; F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां मण्डपलक्षणः विंशति पटलः ; F^2 : इति दीप्तशास्त्रे प्रतिष्ठायां मण्डपलक्षणः पटलः ।

[एकादशः पटलः]
[परिवारलक्षणविधिः][1]

अतः परं प्रवक्ष्यामि परिवारस्य लक्षणम्[2] ।

[१. परिवारालयानां सामान्यलक्षणम्]

[१.१. परिवारसङ्ख्या]

आदिप्रासादबाह्ये तु परिवारान्प्रकल्पयेत्[3] ॥ १ ॥
अष्टौ वै षोडशश्चैव द्वात्रिंशच्च यथाक्रमम्[4] ।
परिवाराः प्रकर्तव्याः प्राकाराभ्यन्तरेष्वपि[5] ॥ २ ॥

[१.२. प्राकारमानानि]

आदिप्रासादविस्तारं यत्तद्दण्डमिहोच्यते[6] ।
[7]अन्तर्मण्डलदण्डार्धाद्दण्डं चान्तरहारकम्[8] ॥ ३ ॥
द्विदण्डमध्यहारायां मर्यादौ च चतुर्थकम्[9] ।
महामर्यादिभित्तिः स्यात्सप्तदण्डप्रमाणकम्[10] ॥ ४ ॥
परितः स्थलसंयुक्तं तत्पूर्वेष्वायतं भवेत्[11] ।

---

१. Manuscrits utilisés: A^1, A^2, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. 1a अतः परं प्रवक्ष्यामि] A, F, अथतः संप्रवक्ष्यामि C, D, G ; 1b परिवारस्य लक्षणम्] C^2, G, परिवारं तु लक्षणम् A^1, C^1, D^2, परिवाराणां तु लक्षणम् (*v.f.*) A^2, D^1, परिवारक्रमं मतम् F.

३. 1c °प्रासादबाह्ये तु] A, D^1, F, °बाह्ये तु परितः C, °बाह्ये तु परिवाराणि D^2, lacune G ; 1d परिवारान्प्र°] F, परिवाराणि A, C, D, G.

४. 2a अष्टौ वै षोडशश्चैव] A^1, G, अष्ट वै षोडशश्चैव A^2, अष्ट षोडशभिश्चैव C, अष्टौ षोडशकं चैव D^1, अष्टं षोडशश्चैव D^2, अष्ट वै षोडशश्चैव F.

५. 2c परिवाराः प्रकर्तव्याः] C, D, G, परिवारं प्रकर्तव्यं A, F ; 2d अन्तरेष्वपि] A^1, D, F, G, lacune C^1, अन्तरेषु च A^2, C^2.

६. 3a आदि°] A, C^2, D, F^2, G, +द्वि° C^1, F^1.

७. F^2 remplace 3cd par : दण्डार्धं मन्तदण्डलीं दण्डेनार्धान्तर्हारया। , F^1 par : दण्डार्धमन्तदण्डल्य दण्डेनार्धान्तर्हारया।

८. 3c दण्डार्धाद्द°] A^1, दण्डार्धन्द° A^2, दण्डार्धं द° C^1, D^1, G, दण्दार्धं द° C^2, D^2 ; 3d दण्डं चान्तरहारकं] Eds., दण्डे चान्तरहारयोः A^1, दण्डैर्वान्तरहारयोः A^2, D, तद्दण्डे वान्त +++ C^1, तद्दण्डे चान्तरं ययोः C^2, तद्दण्डे वान्तहारयोः G.

९. 4a हारायां] A, D^1, हाराय° C, हाराया D^2, G, हारा स्याद् F ; 4b मर्यादौ च] Eds., मध्यादपि A, मर्यादाभि च C^1, D, G, मर्यादाभिश्च C^2, मध्यवार्दी च F^1, मध्यादिश्च F^2.

१०. 4d °प्रमाणकम्] A, °प्रमाणतः C, D, F, G.

११. 5a परितः स्थलसंयुक्तं] F^1, परितो स्थलसंयुक्तं A^1, परिवृतोस्थलसंयुक्तं (*v.f.*) A^2, परि ++++युक्तौ C^1, परि वृते +संयुक्तौ C^2, परिवृतो स्थलसंयुक्तो (*v.f.*) D^1, परिवृतो

अध्यर्धद्विगुणं वापि त्रिगुणं वा चतुर्गुणम्[१] ॥ ५ ॥
मुखायाममिति प्रोक्तं प्राकाराणां विशेषतः[२] ।

[१.३. परिवारालयस्थानानि]

परिवारालयं ग्राह्यं त्रिविधेन प्रकीर्तितम्[३] ॥ ६ ॥
सालभित्त्याश्रितं वाथ अन्तराले तु वा पुनः[४] ।
[५]परिवारं प्रकर्तव्यमन्तर्मण्डलके बुधैः[६] ॥ ७ ॥
परिवाराष्टौ प्रकर्तव्या अन्तर्हारे विशेषतः[७] ।
[८]षोडशं परिवारं स्यान्मध्यहारे यथाक्रमम्॥ ८ ॥
मर्यादाभित्तिके कुर्याद्वात्रिंशत्परिवारकान्[९] ।

[१.४. प्राकारभित्तिविष्कम्भः]

प्राकारभित्तिविष्कम्भं वक्ष्यते क्रमशोऽधुना॥ ९ ॥
अन्तर्मण्डलभित्तेश्च विष्कम्भं हस्तमानतः[१०] ।
[११]तस्मात्त्र्यङ्गुलवृद्ध्या तु षट्त्रिंशत्यङ्गुलान्तकम्[१२] ॥ १० ॥

[१.५. स्नानमण्डपः]

प्रासादाग्रे तु कर्तव्यं स्नानमण्डपमुत्तमम्।

स्थलसंयुक्तौ (*v.f.*) D^2, G, परितः सलयं युक्तं F^2.

१. 5c अध्यर्ध॰] A, F, अव्यय॰ C, अव्य + D, G.

२. 6a मुखायाममिति] A, C^2, D, F, मुखधाममिति C^1, G.

३. 6c ग्राह्यं] A, गृह्य C, D^2, G, ग्राह्य D^1, तत्तत् F ; 6d त्रिविधेन] A^1(etc.), विविधेन F.

४. 7a सालभित्त्याश्रितम्] Eds., लालभित्त्याश्रितं A^1, A^2(?), +लमित्याश्रयं C, सालमित्याश्रयं D, सालभित्त्याश्रयं F, सालमित्याश्रमं G ; 7b अन्तराले तु वा] A^1(etc.), अन्तरालाश्रयं F.

५. F^1 et F^2 remplacent 7cd par : अन्तर्मण्डलके विद्वान्परिवारान्प्रकल्पयेत्।

६. 7c प्रकर्तव्यं] A, C^2, G, तत्प्रकर्तव्यं (*v.f.*) C^1, D.

७. 8a परिवाराष्टौ प्रकर्तव्या] (*v.f.*) C, D, G, परिवाष्टौ तु कर्तव्यं A^1, परिवाराष्टौ तु कर्तव्यं (*v.f.*) A^2, परिवाराष्टकर्तव्यं F ; 8b अन्तर्हारे विशेषतः] A, D^1, F, G, अन्तर्हरेषु शेषतः C, अन्तर्भारैर्विशेषतः D^2.

८. C^1 : lacune 8d.

९. 9a मर्यादाभित्तिके कुर्याद्] A^1, C, D, G, मध्यादाभित्तिके कुर्याद् A^2, मर्यादभित्तौ संस्थाप्य F.

१०. 10a भित्तेश्] A, F, भित्तौ C^2, D^1, भित्ते C^1, D^2, G ; 10b हस्तमानतः] A, D, F^2, हस्तिमानतः C, हस्तमानकम् F, स्तम्भमानतः G.

११. Le texte des vers 10cd à 13ab est très lacunaire dans C^1.

१२. 10c त्र्यङ्गुल॰] A, C^2, D^1, G, द्व्यङ्गुल॰ D^2, F ; 10d ॰शत्यङ्गुलान्तकम्] A^1(etc.), ॰शत्यङ्गुलान्तकम्] A^2, ॰शत्यङ्गुलायतम् F.

प्रासादाध्यर्धकं वापि द्विगुणं वा विशेषतः[१] ॥ ११ ॥
मण्डपस्य तु विस्तारं समं वै चतुरश्रकम्[२] ।
[३]वृतेरुत्तरसीमान्तं मण्डपद्वारमिष्यते[४] ॥ १२ ॥
तस्यार्धं वा त्रिपादं वा द्वारोत्सेधमथापि वा[५] ।
मण्डपद्वारविस्तारमेवमेवं विधीयते[६] ॥ १३ ॥

[२. परिवाराणां स्थानानि]

[२.१ अष्टपरिवाराः चण्डेशालयश्च]

प्राकारस्य तु विस्तारं चतुरंशैर्विभाजयेत्[७] ।
तत्तत्सूत्रे स्थितान्देवानालयेन समन्वितान्[८] ॥ १४ ॥
पूर्वे तु वृषभस्थानमाग्नेय्यां सिंहवाहिनीम्।
याम्ये मातृगणानां तु नैर्ऋत्यां विघ्ननायकम्[९] ॥ १५ ॥
वारुणे तु कुमारं स्याद्वायव्यां काकवाहिनीम्[१०] ।
सौम्ये तु केशवस्थानमैशान्यां भास्करालयम्[११] ॥ १६ ॥
[१२]परिवाराष्टौ विन्यस्य अन्तर्हारे विशेषतः[१३] ।
अन्तर्मण्डलके कुर्यादैशे चण्डेश्वरालयम्[१४] ॥ १७ ॥

---

१. 11c प्रासादाध्यर्धकं] A^2, प्रासादाद्यर्धकं A^1(etc.).

२. 12b वै] C, D, F^1, G, वा A, D^1, F^2.

३. 11.12cd = 7.59ab ; 11.13ab très proche de 7.59cd ; 11.13c = 7.60a.

४. 12c वृतेरुत्तर°] A^1, D, F, व्रतेरुत्तर° A^2, वृत्तैरुत्तर° C, प्रासदोत्तर° G.

५. 13b द्वारोत्सेधमथापि] A, द्वारोत्सेधसमेऽपि C, G, द्वारोत्सेधं समोऽपि D, F.

६. 13c मण्डप°] A, D^1, F, मण्डल° C, D^2, G.

७. 14a प्राकारस्य] A^1(etc.), प्रासादस्य F ; 14b चतुरंशैर्विभाजयेत्] C^1, D, G, चतुरश्रैर्विभाजयेत् A, C^2, चतुर्विंशेषु भजितम् F^1, चतुर्विंशैस्तु भाजितम् F^2.

८. 14c तत्तत्सूत्रे स्थितान्] Eds., तत्तत्सूत्रैः स्थितैर् A, G, तत्तत्सूत्रे स्थिते C, D, तत्र सूत्रैः स्थितो देवो F^1, तत्र सूत्रैः ततो देवो F^2 ; 14d समन्वितान्] Eds., समन्वितम् A(etc.).

९. 15c याम्ये मातृगणानां तु] A^1(etc.), यमे मात्रगणाश्चैव F^1, यामे मा त्रिगुणाश्चैव F^2.

१०. 16a तु कुमारं स्याद्] A, सुकुमारं स्याद् C, G, तु कुमारस्य D^1, F, सुकुमारस्य D^2 ; 16b वायव्यां काकवाहिनीम्] A, वायव्यां काकवाहिनी C, D, G, ज्येष्ठवायव्यगोचरे F.

११. 16c सौम्ये] A^2(etc.), सोमे A^1.

१२. F^1 et F^2 remplacent 17ab par : एवं हि परिवाराष्टौ च अन्तर्हारे तु विन्यसेत्।

१३. 17a विन्यस्य] Eds., तु विन्यस्य (*v.f.*) A, C, D, तु विन्यसेद् (*v.f.*) G.

१४. 17d ऐशे] A^1(etc.), देशे F ; 17d चण्डेश्वरालयम् A^2, C, D, F^1, G, चण्डेश्वलायम् (*v.f.*) A^1, बन्धेश्वरालयम् F^2.

[२.२. षोडशपरिवाराः]

[१]अथ वक्ष्ये विशेषेण षोडशं परिवारकम्[२] ।
प्राकारस्य तु विस्तारं षोडशांशैर्विभाजयेत्[३] ॥ १८ ॥
इन्द्रश्चैवाश्विनी चाग्निपितरश्च यमस्तथा[४] ।
[५]रोहिणी निर्ऋतिश्चैव अप्सरोगण एव च[६] ॥ १९ ॥
वरुणश्च ऋषिर्वायू रुद्रः सोमस्तथैव च[७] ।
क्षेत्रपालस्तथैशानश्चादित्या द्वादश स्मृताः[८] ॥ २० ॥
पूर्वादीनि क्रमान्न्यस्य शिवस्याभिमुखाः स्थिताः[९] ।

[२.३. द्वात्रिंशत्परिवाराः]

[१०]अथ वक्ष्ये विशेषेण द्वात्रिंशत्परिवारकम्॥ २१ ॥
प्राकारस्य तु विस्तारं द्व्यंशं कृत्वा विचक्षणः[११] ।
एकभागवृतं बाह्ये त्यजेच्छेषान्तरं विदुः[१२] ॥ २२ ॥

---

१. C^1 et C^2 ajoutent entre 17cd et 18ab ce colophon : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे परिवारलक्षणविधिरेकादशः पटलः॥ D^1 ajoute un titre : षोडशपरिवारम्।

२. 18b षोडशं परिवारकम्] A^1(etc.), परिवाराणि षोडश F.

३. 18c प्राकारस्य] A^1(etc.), प्रासादस्य F ; 18d षोडशांशैर्वि°] A^1(etc.), षोडशांशेषु F^1.

४. 19a इन्द्रश्चैवाश्विनी चाग्नि°] A^1, G, इन्दुश्चैवाश्विनी चाग्नि°] A^2, इन्द्रश्चाश्चाश्चनि चाग्निभिः C^1, इन्द्रश्चाश्विनी चाग्निश्च C^2, इन्द्रश्चाश्विनिचाग्नीभिः D^1, इन्द्रश्चाश्च नियाग्नीभिः D^2, इन्द्रस्थाने चाश्विनी F^1, इन्द्रस्थानेश्वनी चादी F^2.

५. F^2 donne cette version de 19cd-20cd : रोहिण्यो निर्मतिश्चैव अल्परोहण एव च।
वरुषाश्चा ऋषिगोरश्च रुद्रः सोमस्तथैव च॥
एकबाह्यथैशान्या आदित्याद्वादशा स्मृताः।

६. 19c रोहिणी] A^1(etc.), रोहिण्या F^1 ; 19d अप्सरोगण] A, C, D, G, अल्प्यरोगण F^1.

७. 20a वरुणश्च ऋषिर्वायू] A, वरुणश्च मर्षि वायु C^1, D^2 (?), वरुणो मषि (?) वायु C^2, वरुणश्च म्+षि (?) वायु D^1, वरुणश्च ऋषयवादु F^1, वरुणश्च +ष्ति वायु G.

८. 20d आदित्या द्वादश] A, D^1, आदित्याय दशस्मृतः C^1, G, आदित्याश्च दश C^2, आदित्या वा दशा D^2, अदित्य द्वादशा F^1.

९. 21b शिवस्याभिमुखाः स्थिताः] A^1, एवं स्याद्दिशि वा स्थिताः A^2, शिवस्याभिमुखं ततः C, D, G, शिवस्याभिमुखं भवेत् F.

१०. D ajoutent le titre : द्वात्रिंशत्परिवारम् ; F^1 et F^2 donnent cette version de 21cd : द्वात्रिंशत्परिवाराणि विन्यसेत्तु यथाक्रमम्।

११. 22b विचक्षणः] A^1(etc.), विशेषतः F.

१२. 22c एकभागवृतं] A, D, F^2, एकवारावृतं C^1, एषद्वारवृतं C^2, एकभागे वृतं F^1, एकवाहावृतं G ; 22d छेषान्तरं विदुः] A^1(etc.), भागमभ्यन्तरे स्थितम् F.

उभयोरंशमाश्रित्य परिवारालयं भवेत्[१] ।
तस्य विस्तारमानं तु चतुष्षष्टिपदं कुरु॥ २३ ॥
[२]इन्द्रो गुरुर्महाकालश्चाश्विनी पावकस्तथा।
गौरी चागस्त्यपितरो यमो भार्गव एव च[३] ॥ २४ ॥
[४]गुहः कौशिकरक्षश्च विघ्नेश्वरसरस्वती[५] ।
लक्ष्मी वरुणदुर्गे च ऋषयः काकवाहिनी[६] ॥ २५ ॥
वायुश्च धनदश्चैव रुद्रः कालाग्निरेव च[७] ।
सोमोऽष्टवसवश्चैव नागेन्द्राः पृथिवी तथा[८] ॥ २६ ॥
ईशानः क्षेत्रपालश्च द्वादशादित्यशुक्रकाः[९] ।
द्वात्रिंशत्परिवाराः स्युः सूत्रमध्ये गता इमे[१०] ॥ २७ ॥

---

१. 23a °रंशमाश्रित्य] A^1(etc.), दिशामाश्रित्य F^1, °रीशानमाश्रित्य F^2 ; 23b °लयं भवेत्] F, °लयारभेत् A^1, C, G, °लयमारभेत् (*v.f.*) A^2, D.

२. F^1 et F^2 remplacent 24ab par : अनन्तार्यभवे (F^1 : अनन्तार्या) चैव मोदी (F^1 : मोष) सूक्ष्मस्तथैव च ।

३. 24c गौरी चागस्त्यपितरो] A, C^1, गौरगिस्त्यश्च पितरो C^2, गौरीशस्यपितरो D^1, गौरीरस्य पितरो D^2, गौरीशर्वस्तथा ब्रह्मा F^1, गौरीश्शर्व व्रतं बाह्ये F^2, गौरी अगस्त्यः पितरो G ; 24d voir note suivante.

४. F^2 remplace 24d par sa version de 22d, puis répète 23ab et 24c, remplaçant 24d par : शिवोत्तम ++स्तथा ; vient ensuite la version ci-dessous de 25ab-29ab ; F^1 remplace 24d par : ++शिवो ++स्तथा, puis donne la même version de 25ab-29ab que F^2 :

ईशानं कौशिकं चैव एकाक्षो विघ्न एव च। सरस्वती महालक्ष्मी एकरुद्रस्तथा परम्॥
पशुपतिर्वसवश्चैव महादेवस्त्रिमूर्तिकः। धनदो रुद्रकालाग्नि श्रीकण्ठो नागदेवताः॥
भीमश्च पृथिवी चैव शिखण्डी मरुतस्तथा। उग्रश्शनैश्चराश्चैव द्वात्रिंशत्सूत्रकाः स्मृताः॥
यत्राष्ट परिवारा चेन्मर्यादि बलिपीठकम्। षोदशैः परिवारैश्च द्वात्रिंशत्परिवारकैः ॥
महामर्यादिसंयुक्तं बलिपीठं प्रकल्पयेत्॥

५. 25a गुहः कौशिकरक्षश्च] SNB., गुहः कौशिकरक्षं च A^1, तुहः कौशि +रक्षं च A^2, डभकौशिकरक्षं च C^1, उमौ कौशिकरक्षौ च C^2, इभकौशिकरक्षं D, G ; 25b विघ्नेश्वर°] A, C^1, D, G, विघ्नेशश्च C^2.

६. 25c लक्ष्मी वरुणदुर्गे च] C^2, लक्ष्मीन्द्रवरुणो दुर्गा A^1, लक्ष्मीन्द्रवरुणादुर्गा A^2, लक्ष्मीर्वरुणदुर्गा च C^1, D, G.

७. 26b रुद्रः] A^2, C^2, G, रुद्र A^1, C^1, D.

८. 26d तथा] C^2, D, G, तला A^1, तलाः A^2.

९. 27b शुक्रकाः] C^2, G, शुक्र च A, lacune C^1, शुक्रकः D.

१०. 27c परिवाराः स्युः] Eds., परिवारस्य A, परिवारः स्युः C^1, अत्परिवारषु C^2, G, परिवारसु

मर्यादिभित्तिकं कुर्यादालयं लक्षणान्वितम्[१]

[३. नृत्तमण्डपादिस्थानानि]

मण्डपादग्रतः कुर्यान्नृत्तमण्डपमुत्तमम्॥ २८ ॥

मर्यादिभित्तिबाह्ये तु बलिपीठं प्रकल्पयेत्[२] ।

[३]पीठगोपुरयोर्मध्ये त्रिशूलस्थानमुच्यते[४] ॥ २९ ॥

[५]गोपुरादग्रतः कुर्याद्बाह्यपीठं त्रिदण्डके[६] ।

मर्यादिसालमाश्रित्य पावके हव्यकोष्ठकम्[७] ॥ ३० ॥

कुर्यान्निर्ऋतिदिग्भागे आयुधालयमुत्तमम्।

वायव्यां शयनस्थानमैशान्यां यागमण्डपम्॥ ३१ ॥

[८]द्वाराग्नेययोर्मध्ये विन्यसेद्वह्न्नालयम्[९] ।

यमद्वाराग्निमध्ये तु वाद्यस्थानमुदाहृतम्॥ ३२ ॥

द्वारनैर्ऋतयोर्मध्ये पुष्पमण्डपमुत्तमम्।

[१०]निर्ऋतिद्वारयोर्मध्ये कारयेदन्नालयम्[११] ॥ ३३ ॥

द्वारवायव्ययोर्मध्ये धर्मश्रवणमण्डपम्।

(?) D ; 27d गता इमे] A, D, G, गता इके C.

१. 28a मर्यादिभित्तिकं] A^2, C, D^1, G, मर्यादिभित्तिमं A^1, मध्यादिभित्तिकं D^2.

२. 29a मर्यादि॰] C^1, D, G, मध्यादि॰ A, C^2.

३. C, D et G ajoutent deux quarts de vers entre 29c et 29d : धर्मश्रवणमण्डपम् (C^1 : धर्मश्रव ++++)। शयनस्थानयोर्मध्ये. F^1 et F^2 omettent 29cd et intercalent entre 29ab et 30ab 12 vers et demi (voir p.147 l'appendice à la fin du chapitre).

४. 29c पीठगोपुरयोर्] A^1, C, D, G, पीठमेवं पुरयोर् A^2.

५. F^1 et F^2 donnent la version suivante de 30ab : महागोपुराग्रे तु कुर्यात्पीठं पैशाचसंस्थितम्।

६. 30b बाह्यपीठं त्रिदण्डके] C^2, बाह्ये पीठत्रिदण्डके A, D^2, बाह्यपीठं त्रिमण्डिके C^1, G, बाह्यपीठं तु दण्डिके D^1.

७. 30c मर्यादि] A, C^1, D, F, G, मध्यादि C^2.

८. F^1 et F^2 remplacent 32ab- 36ab par le texte suivant : इन्द्रद्वाराग्निमध्ये तु क्आरयेद्वाजनालयम्।यमद्वाराग्निमध्ये तु कारयेन्मञ्जनालयम्॥ द्वारनैर्ऋतयोर्मध्ये वाद्यस्थानमुदाहृतम्। वारुणद्वारनैर्ऋत्यं धर्मश्रावणमण्डपम्॥ द्वारवायव्ययोर्मध्ये पुस्तकानां धनालयम्। द्वारमीशानयोर्मध्ये कूपस्थानमुदाहृतम्॥ इन्द्रद्वारीशयोर्मध्ये पुष्पमण्डपमुत्तमम्। पूर्वोक्तदेशे कर्तव्ये बलिपीथस्य लक्षणम्॥

९. 32a द्वाराग्नेययोर्] D, द्वाराग्नेयमयोर् A, द्वारमाग्नेययोर् C, G.

१०. C^1 et C^2 omettent 33cd-34cd.

११. 33d अन्नालयं] A, G, मन्नालयं D.

अनिलद्वारयोर्मध्ये पुस्तकाराधनालयम्[१] ॥ ३४ ॥
द्वारेशानोभयोर्मध्ये कूपस्थानं विधीयते[२] ।
ईशानद्वारयोर्मध्ये हस्तिस्थानमुदाहृतम्[३] ॥ ३५ ॥

[४. बलिपीठम्]

पूर्वोक्तदेशे कर्तव्यं बलिपीठं विशेषतः।
[४]गर्भगेहसमो वाथ गर्भगेहार्धमेव वा[५] ॥ ३६ ॥
[६]बलिपीठस्य विस्तारमुत्सेधं तावदेव तु।
[७]पीठोत्सेधं तु विभजेदष्टाविंशतिभागिकम्[८] ॥ ३७ ॥
पादुकाश्विनीभागं स्याद्द्वयंशं जगती भवेत्[९] ।
भूतभागं तथा वप्रं चन्द्रांशेन तु पट्टिका[१०] ॥ ३८ ॥
[११]वेदभागं भवेत्कण्ठमूर्ध्वपट्टी च पूर्ववत्[१२] ।
रुद्रांशं तु महापट्टी चैकांशं चोर्ध्वपट्टिका॥ ३९ ॥
पद्माग्रं तु तथैवं स्यान्नवांशं दलमुच्यते[१३] ।
[१४]ऊर्ध्वपद्मं तथैवं स्यादेवमेवं विधीयते॥ ४० ॥

---

१. 34c अनिलद्वारयोर्] A, वायव्यद्वारयोर् D^1, शयस्वानुयोर् (?) D^2, शयनस्थानयोर् G.

२. 35a द्वारेशानोभयोर्] C^2, द्वारस्यैशानयोर् A, C^1, D, G.

३. 35c ईशानद्वारयोर्] Eds., द्वारस्यैशानयोर् A, C^1, D^2, द्वारेशानोभयोर् C^2, द्वारनैरतयोत् G ; 35d हस्तिस्थानम्] Eds., अस्त्रस्थानं A, G, हस्तस्थानं C, D.

४. F^1 et F^2 remplacent 36cd par : द्वारोत्सेधसमो वापि विस्तारं द्विगुणं तु वा।

५. 36c वाथ] A, G वापि C^2, D.

६. C^1 : à la suite de 36cd donne la fin du chapitre 12 et le début du chapitre 13 et reprend ensuite avec 38cd.

७. F^1 et F^2 remplacent 37cd-38ab par : विभजेत्पीठस्योत्सेधमष्टविंशति भागया। होमा चाश्विनि भागं स्यातेवमेवं प्रकल्पयेत्। (F^1 : होमावाश्विनिभागं) ; ils omettent 38cd-40cd.

८. 37c तु विभजेद्] A, C^2, G, विभजेद् (*v.f.*) D.

९. C^1 intercale (3) (सत्यकाय) et (19); C^2 omet (5)-(6) et intercale (3) (? सत्यकामाय) et (19) (सुग्रीवाय).

१०. (7) भृशाय] C, दृशाय (?) D^2, भ्रंशाय A, F^1, G.

११. (10) पूषाय] A^1, वृषय A^2, पुरुषय C^1, D, पुकषाय C^2, पुरिषाय F^1, पुष्णो G.

१२. (12) गृहक्षताय] A^2, C, D, F^1, G, गृहताय A^1.

१३. C^1 et C^2 remplacent (14) par (2) (पर्जन्याय).

१४. (16) मृशाय] Eds., मृगराजाय A^1(etc.), मृगाय F^1.

१५. (17) पित्रे] A, C^2, D, पितृ...(?) C^1, चित्रे F^1, निर्ऋतये G.

१६. C^1 et C^2 omettent (19) ; D^1 intercale (25) avant (19).

१७. A^1 et A^2 omettent (21) ; G le remplace par जलाधिपाय स्वाहा।

(२१)। असुराय स्वाहा (२२)। शोषाय स्वाहा[१] (२३)। [२]पापयक्ष्मणे स्वाहा (२४)। रोगाय स्वाहा (२५)। [३]वायवे स्वाहा (२६)। नागाय स्वाहा[४] (२७)। मुख्याय स्वाहा (२८)। भल्लाटाय स्वाहा (२९)। [५]सोमाय स्वाहा (३०)। मृगाय स्वाहा (३१)। अदितये स्वाहा (३२)। दितये स्वाहा (३३)। आपाय स्वाहा[६] (३४)। आपवत्साय स्वाहा[७] (३५)। [८]सवित्रे स्वाहा[९] (३६)। सावित्राय स्वाहा (३७)। [१०]इन्द्राय स्वाहा (३८)। इन्द्रजयाय स्वाहा (३९)। रुद्राय स्वाहा (४०)। रुद्रजयाय स्वाहा (४१)। समर्याय स्वाहा (४२)। विवस्वते स्वाहा (४३)। [११]मित्राय स्वाहा (४४)। पृथिवीधराय स्वाहा (४५)। ब्रह्मणे स्वाहा (४६)। [१२]चरक्यै स्वाहा[१३] (४७)। विदार्यै स्वाहा[१४] (४८)। पूतनायै स्वाहा (४९)। पापराक्षस्यै स्वाहा (५०)। [१५]स्कन्धाय स्वाहा[१६] (५१)। अर्यम्णे स्वाहा (५२)। जृम्भकाय स्वाहा (५३)। बलिपिञ्छाय स्वाहा (५४)।

एवं क्रमादग्नौ हुत्वा वै पायसं चरुम्[१७] ।
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्[१८] ॥ २८ ॥
मिन्दाहुतिं च कूष्माण्डं प्रायश्चित्तं हुनेत्क्रमात्।

---

१. (23) शोषाय] A, D, F^1, lacune C^1, ++य C^2.

२. G omet (24) (anormal à cet endroit).

३. F^1 omet (26).

४. (27) नागाय] A^1(etc.), नाशाय F^1.

५. F^1 omet (30)-(44).

६. (34) आपाय] A^1, C, D, G, कृपाय A^2.

७. (35) आपवत्साय] A^1, C, D, G, कृपवत्स्याय A^2.

८. C^1 et C^2 omettent (36)-(37) et les remplacent par सम्ह्राय स्वाहा (C^1: सं ++स्वाहा) et सान्द्राय स्वाहा।

९. (37) सवित्रे] A, G, संसविताय D.

१०. A^1 intercale सावित्र्यै स्वाहा entre (37) et (38).

११. C et D intercalent भुवस्पते स्वाहा avant (44).

१२. A, F^1 et G omettent (47).

१३. (47) चरक्यै] D^1, चरदौ C^1, चरत्यै C^2, चात्यै D^2, तु तर्यै (?) F^1.

१४. (48) विदार्यै] A, D, F^1, G, बिदायै C^2.

१५. C, D, F^1 omettent (51)-(52) (F^1 ajoute प्रतिपादं स्वाहान्तम्).

१६. (51) स्कन्धाय] A^1, G, सकलाय A^2 ; lire स्कन्दाय ?

१७. 28a क्रमादग्नौ हुत्वा] (*v.f.*) A, C^1, D, G, हुत्वा क्रमादग्नौ C^2, एव क्रमादग्निं हुत्वा F^1.

१८. 28d राष्ट्रभृच्च] C, D, F^1, G, राष्ट्रभिश्च A.

हव्यवाहं पुरः स्तुत्य स्विष्टमग्नेति होमयेत्[१] ॥ २९ ॥
स्विष्टान्ते कारयेद्धीमान्यदस्येति विशेषतः[२] ।
परिषेचनं ततः कृत्वा प्रासावीरिति मन्त्रतः[३] ॥ ३० ॥
परिस्तरणपरिधीनाज्याक्तं तत्र दापयेत्[४] ।
ब्रह्मणे तु वरं दद्याद् गौर्वा वै होममेव च[५] ॥ ३१ ॥
प्रणीतोदकेन संप्रोक्ष्य चात्मानं पवमानकैः[६] ।
[७]एवं समाप्य होमं तु प्रणीताप्रत्यक्षमाचरेत्[८] ॥ ३२ ॥
वास्तुहोममिति ख्यातं प्रतिष्ठां च ततः शृणु।
॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वास्तुहोमपटलः एकोनविंशतिः[९] ॥

---

१. 29c पुरः स्तुत्य] A^1, पुरस्कृत्य A^2, C, D, G, पुनः कृत्वा F^1 ; 29d होमयेत्] A, F^1, G, योजयेत् C, D.

२. 30b यदस्येति] A^2, D^1, F^1, वदस्येति A^1, C^1, पदस्येति C^2, D^2, G.

३. 30d प्रासावीरिति F^1, प्रागादितेन A^1, प्रागदिते नु A^2, G, प्रागादिरिति C, D^2(?), प्रागादित्तिरिते (?) D^1.

४. 31b आज्याक्तं तत्र दापयेत्] A, D^2, G, आज्यान्तं तत्र कारयेत् C^1, D^1, आज्यान्तं कारयेत् (*v.f.*) C^2, अभ्युत्तं दापयेत्क्रमात् F^1.

५. 31c वरं] A^1(etc.), वरदं F^1 ; 31d गौर्वा वै होममेव च] A, दूर्वा वै होमयेत् C^1, दुर्वाया होममेव च C^2, दौर्वा वै होममेव च D^1, G, धौर्वा वै होममेव च D^2, वासो वा होममेव वा F^1.

६. 32b चात्मानं पवमानकैः] A, D, F^1, G, पाप्मानं यवनामकैः C.

७. F^1 : lacune correspondant à 32d-33b et au colophon.

८. 32d प्रणीताप्रत्यक्षमाचरेत्] A(etc.), प्रणिपत्य क्षमापयेत् D^1.

९. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वास्तुहोमपटलः विंशतिः ; C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वास्तुहोमविधिरेकोनविंशः पटलः ; C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वास्तुहोमविधिरेकोनविंशतिः पटलः ; D, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वास्तुहोमपटलः विंशतितमः ।

[विंशतिः पटलः]
[लिङ्गस्थापनविधिः][१]

अथातः संप्रवक्ष्यामि लिङ्गस्थापनमुत्तमम्।

[१. प्रतिष्ठाकालः]

अयने पक्षनक्षत्रे तिथिवारांशराशयः ॥ १ ॥
मुहूर्तं तत्र संवीक्ष्य स्थापनं च समारभेत्।
पुष्यमासादि षण्मासं देवानां तु दिवा स्मृतम्[२] ॥ २ ॥
तत्राषाढादि षण्मासं देवानां तु निशा स्मृता[३] ।
दिवाकाले प्रकर्तव्यं लिङ्गस्थापनमुत्तमम्॥ ३ ॥
सितपक्षे द्वितीया च तृतीया पञ्चमी तथा।
षष्ठी च सप्तमी चैव दशमी च त्रयोदशी॥ ४ ॥
एकादशी च तिथयः प्रतिपत्पौर्णमास्यपि[४] ।
प्राजापत्यं च सौम्यं च शैवमादित्यसौम्यके[५] ॥ ५ ॥
पौष्णा बृहस्पतिश्चैव मैत्रं वैष्णवनैर्ऋते[६] ।
वायव्यं चाश्वयुक् त्वाष्ट्रं पैतृकं चोत्तरत्रयम्[७] ॥ ६ ॥
एषु नक्षत्रयोगेषु प्रतिष्ठां च समाचरेत्[८] ।
मेषकर्कटकं तौल्यं मकरं च विवर्जयेत्[९] ॥ ७ ॥

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, G.

२. 2d दिवा स्मृतम्] A, दिवा स्मृता C, D, दिना स्मृतम् G.

३. 3a तत्राषाढादि] A, C^2, तत्र षण्डादि C^1, तत्र षडादि D ; 3b निशा स्मृता] A, C, निशा स्मृताः D, निशाः स्मृताः G.

४. 5b प्रतिपत्पौर्णमास्यपि] A, C, D, प्रतिपत्पूर्णिवास्वपि G.

५. 5d °सौम्यके A^1, D, G, °सहम्यके A^2, lacune C^1, °सौम्यकम् C^2.

६. 6a पौष्णा बृहस्पतिश्] A, पौष्णको बृहस्पती (*v.f.*) C^1, D, पौष्णको बृहस्पतिश् (*v.f.*) C^2, पौष्णो बृहस्पतिश् G ; 6b मैत्रं वैष्णवनैर्ऋते] A, G, चित्री वैष्णवी तथा C^1, चित्रा वैष्णवी तथा C^2, चित्रीं वैष्णवी थै D^1, चित्रं वैष्णवी शनै D^2.

७. 6c वायव्यं चाश्वयुक् त्वाष्ट्रं] A, G, वायव्यं चाश्वयुक् त्वष्टा C, नैऋतं वायव्यश्चाश्वयुक् त्वष्टा D^1, त्रश्तं ?वायव्यश्चाश्वयुक् त्वष्टा D^2 ; 6d पैतृकं चोत्तरत्रयम्] A, C^1, D^2, G, चैत्रभं चोत्तरत्रयम् C^2, पैतृकं चोत्र त्रयम् D^1.

८. 7b समाचरेत्] A^1, समारभेत् A^2, C, D, G.

९. 7d विवर्जयेत्] A, C, D, विसर्जयेत् G.

[१]शेषेषु स्थापयेल्लिङ्गं धनूराशिं च वर्जयेत्[२] ।
गुरुभार्गवसौम्यानां वारः सोमस्य शोभनम्[३] ॥ ८ ॥
एषां द्रेष्काणहोराश्च अंशकं दर्शनं शुभम्[४] ।
एषामेवोदयं शस्तं वर्ज्यं सोमोदयं सदा[५] ॥ ९ ॥
भानुमन्दारसोमाश्च त्रिषडायगताः शुभाः[६] ।
सर्वे ग्रहा विवर्ज्याः स्युरष्टमस्था विशेषतः ॥ १० ॥
षड्वसदशमं हित्वा शुक्राश्चान्ये च शोभनाः[७] ।
[८]उत्तराषाढसंयुक्तसोमवारस्तु शोभनः[९] ॥ ११ ॥
हस्तश्चाश्वयुजं वह्नि बुधवारेण वर्जयेत्[१०] ।
[११]मृगशीर्षोत्तरा चेह अन्यवारेण वर्जयेत्[१२] ॥ १२ ॥
वैष्णवं चैव तिष्यं च शुक्रवारेण वर्जयेत्।
बुधयुक्ता द्वितीया च षष्ठीयुक्तो बृहस्पतिः ॥ १३ ॥

---

१. C^2 omet 8ab.

२. 8b धनू] A, C^1, D^1, G, धनु॰ D^2.

३. 8c ॰सौम्यानां] A^2, D, G, ॰सौम्यायां A^1, C ; 8d वारः सोमस्य शोभनम्] A, वाराः सोमस्य शोभनाः C, वारा सोमस्य शोभना D, वाराः सोमस्य शोभनम् G.

४. 9a एषां द्रेष्काणहोराश्] A^1, एषां द्रेक्कणहोरश्च A^2, G, एकां द्रेक्काणहोरस् C, एषां देक्काणहोराश्च D ; 9b अंशकं दर्शनं] Eds., अंशकां दशनां A^1, G, अंशकां दर्शनां A^2, अङ्गनं दर्शनं C, अङ्गादर्शनं (*v.f.*) D.

५. 9c एषामेवोदयं] C^2, एषामेवोदशं A^1, G, एषामेव दशं A^2, एषामेयोदयं C^1, D^1, एषो मेषोदयं D^2 ; 9d वर्ज्यं सोमोदयं सदा] C, G, वर्ज्यः सोमोदयं सदा A^1, वर्ज्याः सोमाद्यः सदा A^2, वर्ज्यं सोममयं शुभम् D^1, वर्ज्यं समोमयं सदा D^2.

६. 10a भानुमन्दारसोमाश्] A^1, C^1, भानुमन्दारसोमश् A^2, G, भानुमन्दारसौम्याश् C^2, तानुमन्तानसोमाश् D^1, भानुनन्दानसोमाश् D^2 ; 10b त्रिषडायगताः शुभाः] Eds., त्रिषष्ठायगताः शुभाः A, C, G, त्रिषष्ठायगतां शुभाम् D^1, त्रिविष्ठायगताः शुभाः D^2.

७. 11b शुक्राश्चान्ये च] A^1, शुक्राश्चान्याश्च A^2, शुक्रश्चान्यश्च C^1, शुक्रं चान्यश्च C^2, शुकश्चान्याश्च D^1, शुक्रश्चान्याश्च D^2, शुक्लश्चान्यश्च G.

८. C omettent 11cd.

९. 11d तु शोभनः] A^1, C, तु शोभनं A^2, D^1, G, सशोभनः D^2.

१०. 12a हस्तश्चाश्वयुजं वह्नि] A, C^1, G, हस्तश्चाश्वयुजं वह्निं C^2, हस्ताश्चाश्वजं वह्नि D.

११. D^1 omet 12cd et 13ab.

१२. 12c मृगशीर्षोत्तरा चेह] A^1, मृगशिर्षोत्तरवोह(?) A^2, मृगशीर्षोत्तरा चोभाव् C^1, D^2, मृगशीर्षा चोत्तराभ॰ C^2, मृगशीर्षोत्तरा सोहाव् G ; 12d अन्यवारेण] A, D^2, अन्ये वारेण C^1, मारवारेण C^2, अत्यवारेण वर्जयेत् G.

चन्द्र एकादशीयुक्तः प्राणहानिं च कारयेत्[१] ।
सप्तमी पौष्णसंयुक्ता वह्निवद्दहते प्रजाम्॥ १४ ॥
अन्धं षण्ढं च नक्षत्रं वर्ज्यं स्थापनकर्मणि[२] ।
पांसुलोहितवर्षेषु मेघानां स्तनितेषु च[३] ॥ १५ ॥
उल्कापाते दिशां दाहे ग्रहणे चन्द्रसूर्ययोः[४] ।
षडशीतिमुखे चैव स्थापनं न समाचरेत्॥ १६ ॥

[२. अङ्कुरार्पणम्]

प्रतिष्ठादिवसात्पूर्वे नवमे सप्तमेऽपि वा[५] ।
अङ्कुराण्यर्पयेद्धीमान् शास्त्रदृष्टेन कर्मणा॥ १७ ॥
पालिका घटिका चैव शरावं च त्रिधा भवेत्[६] ।
प्रत्येकं द्वादशं गृह्य ततः स्थापनमारभेत्[७] ॥ १८ ॥
मण्डपे प्रासादाग्रे तु स्थण्डिलं कुरु देशिक[८] ।

[२.१. मण्डलम्]

प्रागग्रं दशसूत्राणि उदगग्रं तथैव च॥ १९ ॥
मध्ये चैकपदं त्यक्त्वा लोपयेदभितोऽष्टकम्[९] ।
चतुर्दिक्षु चतुर्द्वारं पदमेकं परित्यजेत्॥ २० ॥
द्वारस्थापनपार्श्वे तु पदमेकं परित्यजेत्।
मध्यमे तु पदे कुर्यात्स्थण्डिलं पद्मसंनिभम्॥ २१ ॥
[१०]आग्नेयादिषु कोणेषु त्रिषु त्रिषु पदेष्वथ[११] ।

---

१. 14b प्राणहानिं च] A^1, C, G, प्राणहानिश्च A^2, प्राणाहानि च D.

२. 15a अन्धं षण्ढं च नक्षत्रं] G, अब्धं षण्डं च नक्षत्रं A^1, अण्डं षण्डं च नक्षत्रं A^2, अन्धं षस्थं च नक्षत्रे C^1, अन्धं षष्ठं च नक्षत्रं C^2, अन्धषस्थं च नक्षत्रं D^1, अर्धषस्थं च नक्षत्रं D^2.

३. 15d मेघानां स्तनितेषु च] A, C, G, मघानां सतिस्तनि तेषु च D^1, मखानां समिस्तनितेषु च D^2.

४. 16a उल्कापाते दिशां दाहे] D^1, उल्कापाते दिशादाहे A, C, उल्कापाते दिशान्दाहे D^2, उष्णवाते दिशादाहे G.

५. 17a प्रतिष्ठादिवसात्] A, G, प्रतिष्ठादिवसे C, D ; 17b नवमे] A^1, नवाहे C, D.

६. 18b शरावं च त्रिधा] C, D, शरावा त्रिविधा A, G.

७. 18c गृह्य] Eds., ग्रह्य A^2, D, ग्रह्यं A^1, C, G.

८. 19b देशिक] A^1, G, देशिकः A^2, C^1, D^2, देशिकम् D^1, देशिका C^2.

९. 20a मध्ये] A^2, C, D, G, मध्यमे (*v.f.*) A^1 ; 20b लोपयेद्] A, लोभयेद् C, D^2, G, वोभयेद् D^1.

१०. A^2 omet 22ab-23ab.

११. 22a आग्नेयादिषु कोणेषु] A, C, आग्नेय्यादिकोणेषु D ; 22b त्रिषु त्रिषु पदेष्वथ] D^1, त्रिषु

[१]स्थण्डिलं कारयेद्धीमान्प्रत्येकं प्रस्थशालिना।
आग्नेयादिषु कोणेषु पञ्चपञ्चपदेष्वथ॥ २३ ॥
स्थण्डिलं कारयेत्तत्र द्वारस्थपदमध्यमे[२] ।
तण्डुलैः शोभितं कृत्वा तिलदर्भैः परिस्तरेत्[३] ॥ २४ ॥
गन्धादिना समभ्यर्च्य ततः स्थापनमारभेत्।
कर्णिकायां न्यसेत्कुम्भं वारुणोदकपूरितम्[४] ॥ २५ ॥
सकूर्चं सापिधानं च सवस्त्रं हेमसंयुतम्।
पूजयित्वा यथान्यायं वारुणं मन्त्रमुच्चरन्[५] ॥ २६ ॥
पायसान्नं ददेद्धीमान् ताम्बूलं च निवेदयेत्।

[२.२. घटिकादिन्यासः]

आग्नेयादिपदे न्यस्त्वा द्वादशघटिकान्तिके[६] ॥ २७ ॥
आदित्ये भ्रंशवितथे याम्यायां भृङ्गराजके[७] ।
सुग्रीवे वरुणे शोषे मुख्ये सोमपदेषु च[८] ॥ २८ ॥
अदितौ जयन्ते स्थाप्य पालिका च विशेषतः[९] ।
शेषस्थाने शरावाणि न्यसेद्वै देशिकोत्तमः[१०] ॥ २९ ॥
ब्रह्माविष्ण्विन्द्रदैवत्यान्पात्रान्मृत्कार्षपूरितान्[११] ।

त्रिषु पदष्वपि A^1, G, त्रिषु दिक्षु पदष्वथ C.

१. A^1 et D^2 ajoutent 24 cd entre 22ab et 23ab, (et le répètent à sa place).

२. 24b °पदमध्यमे] A, C, D^2, G, °पदमण्डमे D^1.

३. 24c तण्डुलैः] A^1, स्थण्डिलैश् A^2, C^2, D^2, lacune C^1, तण्डुलैश् G.

४. 25cd कुम्भं वारुणोदक°] C^2, कुम्भवारुणीमुदक° (*v.f.*) A, कुम्भं वरुणमुदक° (*v.f.*) C^1, कुम्भं वरुणीमुदक° (*v.f.*) D, G.

५. 26c यथान्यायं] A, C, G, यथान्यासं D ; 26d वारुणं] C, वारुणीं A, D, lacune G.

६. 27d द्वादश°] A, D, G, द्वादशं C.

७. 28a आदित्ये भ्रंशवितथे] A^1, आदित्ये भ्रंशे वितथे A^2, lacune C^1, आदित्ये भ्रमरे चापि C^2, आदित्ये भृशे तथै D, आदित्यभृङ्गे वितथे G ; 28b याम्यायां भृङ्गराजके] A^1, D^2 (?), G, शतथैमभ्रराजके C^1, शतधौमभ्रमराजिते C^2, याम्ययां प्रङ्गराजके D^1.

८. 28d मुख्ये सोमपदेषु च] A^1, C^2, D, G, lacune A^2, मुख्या सोमपदेषु वा C^1.

९. 29a अदितौ जयन्ते] Eds., आदित्ये यन्तके A^1, आदित्यौ जयन्तके (*v.f.*) A^2, G, अतितौ जयन्तक (*v.f.*) C^1, अदितं जयन्तकं (*v.f.*) C^2, अदितौ जयन्तक (*v.f.*) D.

१०. 29c शेषस्थाने शरावाणि] A^2, C, D, G, शेषस्थानेन वारुण्यं A^1.

११. 30b मृत्कार्ष°] A^2, G, उत्कर्ष° A^1, C, मृक्कर्ष° D.

[२.३. बीजवापनम्]

[1]बीजानि वापयेत्पश्चात्पवमानमुदीरयन्[2] ॥ ३० ॥
तिलसर्षपमुद्गानि माषशिम्बाढकानि च।
कुलुत्थं सप्तबीजानि वापयेद्धृदयेन तु[3] ॥ ३१ ॥
पूजयित्वा यथान्यायं कुम्भतोयेन सेचयेत्[4] ।
पिधाय सर्वपात्राणि स्वनुगुप्ते निधापयेच्च[5] ॥ ३२ ॥

[३. यागमण्डपम्]

[३.१. यागमण्डपलक्षणम्]

यागार्थमण्डपं कुर्यात्प्रासादस्याग्रतोऽन्तिके।
सूत्रेण सुमितं कृत्वा भूमिशल्यं विवर्जयेत्[6] ॥ ३३ ॥
द्वात्रिंशद्धस्तविस्तारं मण्डपं चोत्तमं स्मृतं।
चतुष्षष्टिस्तम्भयुक्तं द्वादशं तालमुच्छ्रयम्[7] ॥ ३४ ॥
[8]मण्डपस्य तु तन्मध्ये चतुर्गात्राणि संत्यजेत्।
विंशद्धस्तप्रविस्तारं मण्डपं मध्यमं भवेत्[9] ॥ ३५ ॥
षट्त्रिंशद्गात्रसंयुक्तं दशतालसमुच्छ्रयम्।
चत्वारि मध्यस्तम्भानि त्यजेद्वै देशिकोत्तमः[10] ॥ ३६ ॥
हस्तैर्द्वादशभिर्युक्तं मण्डपं चाधमं भवेत्।
[11]अधमत्रयलिङ्गस्य मण्डपं चाधमं भवेत्[12] ॥ ३७ ॥

---

१. C^1 omet les vers 30cd-185cd.

२. 30d पवमानमुदीरयन्] A, G, सपश्चात्पावनानि तु C^2, पश्चात्पवनानि तु D.

३. 31c कुलुत्थं] A^1, कुलस्थं A^2, D^2, कुलत्थं C^2, G, कुपस्थं D^1.

४. 32a यथान्यायं] A, G, विधानेन C^2, D.

५. 32c पिधाय सर्वपात्राणि] A, C^2, G, विधाय सर्ववस्त्राणि D ; 32d निधापयेत्] C^2, D, निधाय च A, G.

६. 33c सुमितं] D, G, समितं A, सुमिति C^2 ; 33d भूमिशल्यं] A, भूशल्यं च C^2, D^2, मूलशल्यां D^1, भूमिशैल्यं G.

७. 34c °स्तम्भयुक्तं] A^1, G, संयुक्तम् D ; 34d तालमुच्छ्रयम्] A, D^2, G, तालकोत्तछ्रयम् C^2.

८. A, G omettent 35ab-36ab.

९. 35c विंशद्धस्तप्रविस्तारं] D^2, वरशस्तारं प्रविस्तारं C^2, विंशत्वस्तप्रविस्थारं D^1.

१०. 36c चत्वारि] A^1, C^2, D^2, G, चत्वारिंषद् A^2, चत्वरि° D^1.

११. C^2 omet 37cd.

१२. 37c अधम°] A, C^2, D, प्रथम° G.

[३.२. वेदिकादिलक्षणम्]

मण्डपस्य त्रिभागैकं मध्यमे वेदिका भवेत्[१] ।
अरत्निमात्रमुत्सेधं दर्पणोदरसंनिभम्[२] ॥ ३८ ॥
वेद्यधश्चोपवेदीं च कल्पयेत्तु समन्ततः[३] ।
विस्तारमष्टमाङ्गुल्यमुत्सेधं स्यात्तदर्धकम्[४] ॥ ३९ ॥
द्व्यङ्गुलद्व्यङ्गुलं हीनं मध्यमस्याधमस्य तु[५] ।
कुण्डवेदिकयोर्मध्ये त्यक्त्वा हस्तद्वयं पुनः ॥ ४० ॥
चतुरश्रं धनुर्वृत्तं पद्मं पूर्वादिदिक्षु च।
योनित्रिकोणपञ्चाश्रमष्टाश्रं स्याद्विदिक्षु वै॥ ४१ ॥
उत्तमत्रयलिङ्गस्य द्वात्रिंशत्कुण्डमारभेत्।
मध्यमत्रयलिङ्गस्य चतुर्विंशत्कुण्डमुच्यते[६] ॥ ४२ ॥
अधमत्रयलिङ्गस्य कुण्डान्यष्टौ प्रकल्पयेत्[७] ।
देवेन्द्रेशानयोर्मध्ये कुण्डं प्राधानिकं कुरु[८] ॥ ४३ ॥
हस्तमात्रप्रविस्तारम् एवं मात्राङ्गुलेन तु[९] ।
[१०]मेखलात्रयसंयुक्तमेकैकं तु त्रयाङ्गुलम्[११] ॥ ४४ ॥
नाभियोनिसमायुक्तं निम्नोन्नतविवर्जितम्।
अश्वत्थपत्रवद्योनिः नाभिः पद्माकृतिर्भवेत्॥ ४५ ॥
त्र्यङ्गुलं योनिविस्तारं त्रिगुणं दैर्घ्यमुच्यते[१२] ।

---

१. 38b मध्यमे] A, G, मध्यमं C^2, D^2, lacune D^1.

२. 38c अरत्निमात्रमुत्सेधं] A, C^2, शक्तिमात्रसमुत्सेधं D^1, रत्निमात्रं समुत्सेधं D^2, G.

३. 39a चोपवेदीं] D^1, G, चोपवेदी A, चोपवेदिं C^2, D^2.

४. 39c विस्तारमष्टमाङ्गुल्यं] A, वितानमष्टमाङ्गुलीं C^2, विततामष्टाङ्गुल्यं D^1, विस्तारष्टाङ्गुल्यं D^2, विस्तारमष्टं अङ्गुलम् G.

५. 40b मध्यमस्याधमस्य तु] A, G, मध्यमं स्याद्धि तस्य तु C^2, मध्यमस्यात्ततधस्य तु D^1, मध्यमस्यात्तधस्य तु D^2.

६. 42d °विंशत्कुण्डमुच्यते] A, D, °विंशद्धि कुण्डकम् C^2, °विंशतिकुण्डकम् G.

७. 43b कुण्डान्यष्टौ] A^2, C^2, G, कुण्डमष्टौ A^1, D.

८. 43c देवेन्द्रेशानयोर्] C^2, इन्द्र ईशानयोर् A^1, G, इन्दु ईशानयोर् A^2, इन्द्रेशानयोर् D^1, ऐन्द्रेशानयोर् D^2.

९. 44b एवं] G, एव A, D^1, मेय C^2, D^2.

१०. C^2 omet 44cd-46ab.

११. 44d त्रयाङ्गुलं] G, त्र्यङ्गुलम् A^1, C^2, D, त्रयङ्गुलं A^2.

१२. 46b त्रिगुणं] A, C^2, G, द्विगुणं D.

चतुरङ्गुलविस्तारं पद्मं कुण्डस्य मध्यमे॥ ४६ ॥
कुर्याद्वै विष्टरं कुण्डे परितोऽष्टाङ्गुलेन तु[१] ।
दर्पणोदरसंकाशं वितानोपरिशोभितम्॥ ४७ ॥
चतुर्द्वारसमायुक्तं मण्डपं तोरणान्वितम्।

[३.३. तोरणलक्षणम्]

पञ्चहस्तसमुत्सेधं विस्तारं स्यात्तदर्धकम्॥ ४८ ॥
शूलं हस्तप्रमाणं स्यान्नाहं तस्य षडङ्गुलम्[२] ।
अधमाधममेतद्धि वक्ष्यते तत्परं क्रमात्[३] ॥ ४९ ॥
पञ्चहस्तं समारभ्य यावत्स्यान्नवहस्तकम्।
तावत्तालाधिकं कुर्यात्तत्तदर्धं तु विस्तृतम्[४] ॥ ५० ॥
तस्मात्तद्व्यङ्गुलाधिक्यं नाहं प्रत्येकमाचरेत्[५] ।
[६]नवधा तोरणं प्रोक्तं नवलिङ्गे यथाक्रमम्[७] ॥ ५१ ॥

[३.४. ध्वजलक्षणम्]

अष्टदिक्षु ध्वजानष्टौ लम्बयेत्तु प्रदक्षिणम्।
नीलवर्णं तु पूर्वस्यां आग्नेय्यां रक्तवर्णकम्[८] ॥ ५२ ॥
कृष्णवर्णं तु याम्यायां धूम्रवर्णं तु नैर्ऋते।
शङ्खाकृतिनिभाकारं वारुण्यां दिशि लम्बयेत्[९] ॥ ५३ ॥
वायव्यां शाबलं ज्ञेयं शातकुम्भाभमुत्तरे[१०] ।
ऐशान्यां पीतवर्णं तु तेषां लक्षणमुच्यते॥ ५४ ॥
विंशत्यङ्गुलविस्तारं त्रिदशाङ्गुलमायतम्[११] ।

---

१. 47a विष्टरं] A^2, C^2, D, विष्ठरं A^1, G ; 47b परितोऽष्टाङ्गुलेन] A^2, C^2, D, G, परितोषाङ्गुलेन A^1.

२. 49b lacune dans A^2.

३. 49d वक्ष्यते तत्परं] A, G, वक्ष्यते च ततः C^2, वक्ष्यन्ते तः परम् D.

४. 50d विस्तृतं] A, C^2, D^1, G, विस्मृतम् D^2.

५. 51b आचरेत्] A, G, उच्यते C^2, D.

६. C^2 omet 51d-53a.

७. 51c प्रोक्तं] A, D, G, कृष्णं C^2 ; 51d °क्रमम्] A, C^2, D^1, G, क्रमात् D^2.

८. 52c पूर्वस्यां] G, पूर्णायां A^1, पूर्वायां A^2, D.

९. 53c शङ्खाकृतिनिभाकारं] A^1, शङ्खकुन्दनिभाकारं C^2, D ; 53d लम्बयेत्] A, D, G, लङ्घयेत् C^2.

१०. 54a वायव्यां] A^1, C^2, D, G, वारुण्यां A^2.

११. 55b त्रिदशाङ्गुलम्] A^1, त्रिंशदङ्गुलम् A^2, C^2, D^1, G, त्रिशताङ्गुलम् D^2.

विस्तारेण समं पुच्छं तदर्धं शिखरं भवेत्[१] ॥ ५५ ॥
ध्वजमध्ये लिखेद्धीमान्दिग्गजांश्च विशेषतः।
ऐरावतं पुण्डरीकं पुष्पदन्तं तु कौमुदम्॥ ५६ ॥
अञ्जनं वामनं चैव सुप्रदीपं च सर्वकम्[२] ।
दर्भमालाभिरावृत्य समन्तान्मण्डपं ततः[३] ॥ ५७ ॥
पञ्चदर्भैस्तु संयोज्यं हस्तमात्रं प्रलम्बकम्[४] ।
पर्वे पर्वे तु संयोज्य रज्जुं कुर्यान्मनोरमम्[५] ॥ ५८ ॥

[३.५. उपवेदीलक्षणम्]

मङ्गलाष्टकरूपाणि उपवेद्युपरि न्यसेत्।
द्वादशाङ्गुलमायामं विस्तारं स्यात्तदर्धकम्॥ ५९ ॥
अधस्तात्पद्मपीठं स्याच्चतुरङ्गुलमानतः।
तन्मध्यमे लिखेद्धीमान्दर्पणं पूर्णकुम्भकम्॥ ६० ॥
वृषभं भेरीमत्स्यं च श्रीवत्सं वज्रदीपकम्[६] ।
सुवस्त्रपट्टदेवाङ्गैर्मुक्तादामैर्विभूषयेत्[७] ॥ ६१ ॥

[४. लक्षणोद्धारविधिः]

[४.१. लक्षणोद्धारमण्डपम्]

मण्डपस्योत्तरे पार्श्वे लक्षणोद्धारणाय च[८] ।
मण्डपं कारयेद्धीमान्पूर्वोक्तार्थमनुस्मरन्[९] ॥ ६२ ॥
[१०]तन्मध्ये वेदिकां कुर्याल्लिङ्गायामप्रमाणतः।
तालमात्रं समुत्सेधं दर्पणोदरसंनिभम्[११] ॥ ६३ ॥

---

१. 55c पुच्छं] A, C², D, पश्चाद् G.

२. 57b सुप्रदीपं च सर्वकं] A, G, सुप्रतीकान्तु सर्वगं C², सुप्रतीकं तु सर्वकं D.

३. 57d मण्डपं ततः] A, C², D, कुण्ड+++ G.

४. 58a दर्भैः] A, C², D, दर्भंश् G ; 58b प्रलम्बकम्] A¹, प्रलम्बयेत् C², प्रलम्बकैः D.

५. 58c पर्वे पर्वे] A, C², D, पूर्वे पूर्वे G.

६. 61b श्रीवत्सं वज्रदीपकम्] A, G, श्रीवत्सं गमदीपमे C², श्रीमंस्य गमभदीपके D, श्रीवत्सकं वज्रदीपकम् G.

७. 61c सुवस्त्र°] A, D¹, G, स्रवन्ति C², सुवस्तु° D² ; 61d विभूषयेत्] A, च भूषयेत् C², D, G.

८. 62b लक्षणोद्धारणाय] A¹, C², G, लक्षणोत्तद्धरणाय D¹, लक्षणोक्तं धरणाय D².

९. 62c कारयेत्] A, D, कारयित्वा C² ; 62d अनुस्मरन्] A, G, अनुक्रमात् C², D.

१०. D¹ et D² omettent 63cd-199cd et insèrent à la place un texte emprunté au chapitre du *Rauravāgama* traitant des images (cf. *Raurava* Kp.35.154-299).

११. 63d दर्पणोदर°] A¹, C², G, दर्पणोत्सेध° A².

तस्यास्तु पश्चिमे स्थाने स्नानश्वभ्रं प्रकल्पयेत्[१] ।
लिङ्गानुरूपमन्तरे दारुपीठसमन्वितम्[२] ॥ ६४ ॥
उत्तरे जलमार्गः स्यादवटेन समन्वितम्[३] ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥ ६५ ॥
शिल्पिनं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः[४] ।

[४.२. लिङ्गशुद्धिरधिवासश्च]

संयतः शिल्पिभिः सार्धं गच्छेत्कर्मकुटीं बुधः[५] ॥ ६६ ॥
लिङ्गं प्रक्षालयेद्धीमानष्टमृत्सलिलेन तु।
पञ्चगव्यैः कषायैश्च स्नापयेद्गन्धतोयकैः ॥ ६७ ॥
रक्तवस्त्रेण संवेष्ट्य दर्भैः पुष्पैर्विचक्षणः।
पिण्डिकां स्थापयेत्तत्र ह्युमाबीजमनुस्मरन्[६] ॥ ६८ ॥
रथं संपूज्य गन्धाद्यैरलंकृत्य विशेषतः[७] ।
तस्मिन्नारोपयेल्लिङ्गं सर्वातोद्यसमन्वितम्॥ ६९ ॥
लक्षणोद्धारणार्थाय नयेदुत्तरमण्डपे।
स्थण्डिलं कारयेद्विद्वान्शालिभिस्तण्डुलैः सह॥ ७० ॥
तिलदर्भैः परिस्तीर्य लिङ्गं तत्रैव शाययेत्[८] ।
प्राक्शिरस्कं शयित्वा तु परितोऽष्टघटान्न्यसेत्[९] ॥ ७१ ॥
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान्[१०] ।
लोकपालाधिदैवत्यान्पूजयेत्स्वस्वनामतः ॥ ७२ ॥
लिङ्गमूले न्यसेत्पीठं पीतवस्त्रेण वेष्टयेत्[११] ।
वेदिकायास्तु पूर्वस्यां स्थण्डिले होममाचरेत्[१२] ॥ ७३ ॥

---

१. 64a स्थाने] A, G, भागे C^2.

२. 64c °रूपमन्तरे] Eds., °रूपमन्तस्य A^1, C^2, °रूपदन्तस्य A^2, lacune G.

३. 65b समन्वितम्] A, G, समायुतम् C^2.

४. 66b °हेमाङ्गुलीयकैः] A, G, °भूगन्धधूपकैः C^2.

५. 66c संयतः] A^1, C^2, G, सुयत° A^2.

६. 68d ह्युमाबीजम्] A, lacune C^2, उमाबीजम् G.

७. 69b रथं] A^1, G, रविं A^2, द्वारं C^2.

८. 71b शाययेत्] A, G, शालयेत् C^2.

९. 71c शयित्वा] A, G, शाययित्वा (*v.f.*) C^2.

१०. 72b वारिपूरितान्] A, G, वारिपूजयेत् C^2.

११. 73a पीठं] A^2, C^2, G, पीठे A^1 ; 73b वेष्टयेत्] A, G, वेष्टितम् C^2.

१२. 73c पूर्वस्यां] G, पूर्वायां A, C^2.

आपो राजेति मन्त्रेण इदं विष्विति मन्त्रतः[१] ।
ब्रह्मजज्ञानमन्त्रेण घृतेनाष्टशतं हुनेत्[२] ॥ ७४ ॥
पृथगष्टशतं हुत्वा स्विष्टान्तं हि समाचरेत्[३] ।
अधिवसेदेव रात्रौ लिङ्गे कौतुकमाचरेत्[४] ॥ ७५ ॥
पूजाभागे हृदा बध्वा कौतुकं शिल्पिने ददेत्[५] ।

[४.३. सूत्रवर्तनम्]

प्रभाते सुमुहूर्ते तु लक्षणोद्धारणं कुरु[६] ॥ ७६ ॥
[७]पायसं घृतसंयुक्तं शिरःस्थाने बलिं ददेत्।
मुद्गान्नं घृतसंयुक्तं दध्यन्नं गुलसंयुतम्॥ ७७ ॥

[४.३.१. रेखामानम्]

लिङ्गमानप्रमाणेन रेखाविस्तारमुच्यते[८] ।
पूजाभागोच्छ्रयं सर्वं भज्य षण्णवतिक्रमात्[९] ॥ ७८ ॥
एकभागं यवं विद्यात्तन्मानं सूत्रविस्तृतम्[१०] ।
अस्मादन्यप्रकारेण वक्ष्यते विधिनाऽधुना[११] ॥ ७९ ॥
उत्तमोत्तमलिङ्गस्य सूत्रं च यवकं भवेत्[१२] ।
शेषाणां चैव लिङ्गानां यवार्धं प्रतिवर्धयेत्[१३] ॥ ८० ॥
सूत्रविस्तारमेवं स्यात्खातं तन्मानमेव च।

---

१. 74a आपो राजेति] G, आपो राजान A^1, अद्योराजान A^2, अधोरायेति C^2, lire peut-être आहो राजेति.

२. 74c °जज्ञान°] A^2, C^2, G, °ष्वज्ञान° A^1 ; 74d घृतेना°] A^2, G, व्रतेना° A^1, घृतम° C^2.

३. 75b स्विष्टान्तं] A^2, C^2, G, स्विष्टं तं A^1.

४. 75c °देव रात्रौ] A^1, °देवं रत्रौ A^2, °दैवरत्रौ C^2, च रत्रौ G ; 75d लिङ्गे] A, G, लिङ्गं C^2.

५. 76a पूजाभागे हृदा] A^2, G, पूजाभागेन्द्रदा A^1, पूजान्तेद्य हृदा C^2 ; 76b ददेत्] A^2, C^2, G, ददौ A^1.

६. 76c सुमुहूर्ते] A^2, C^2, G, सर्वभूते A^1 ; 76d कुरु] A, G, नयेत् C^2.

७. C^2 omet 76b-76c.

८. 78a लिङ्गमान°] A, G, लिङ्गमाने C^2.

९. 78c पूजाभागोच्छ्रयं] A^2, G, प्रजाभागोच्छ्रयं A^1, पूजाभा+++ C^2.

१०. 79a एकभागं यवं] C^2, एकभागाय खं A^1, एकभागयवं A^2, एकभागं वधं G ; 79b तन्मानं] A, G, तन्नाहं C^2.

११. 79c अन्यप्रकारेण] A^1, C^2, G, अर्धप्रमाणेन A^2.

१२. 80b सूत्रं च यवकं] A^1, सूत्रं च यवं (?) A^2, सूत्रं पञ्चयवं C^2, सूत्रपादयवं G.

१३. 80d प्रतिवर्धयेत्] A, G, प्रतिस्रावयेत् C^2.

[४.३.२. रेखालेखनम्]

कन्यावर्तितसूत्रेण घटिकापूजितेन तु[१] ॥ ८१ ॥
[२]विष्कम्भं मध्यमं कृत्वा तत्र सूर्चीं विनिक्षिपेत्[३] ।
भ्रामयेत्तु शिरस्सूत्रं मस्तकान्तं विचक्षणः ॥ ८२ ॥
नागोष्टेन नलोष्टेन नवाङ्गारेण वञ्चना[४] ।
ब्रह्मभागं चतुर्दिक्षु मध्यं ज्ञात्वा विशेषतः[५] ॥ ८३ ॥
अष्टाश्रं मध्यमं कृत्वा गैरिकाक्तेन पातयेत्[६] ।
ब्रह्मभागं समारभ्य यावल्लिङ्गस्य मस्तकम् ॥ ८४ ॥
ततश्चास्फोटयेन्मध्ये रेखा सा मध्यमा स्मृता[७] ।
रेखा लेखान्तरं लक्ष्य ततः सूत्रं समालिखेत्[८] ॥ ८५ ॥
[९]++++++++उभयोः पार्श्वयोरपि[१०] ।
सूत्रमास्फालयेद्विद्वानष्टादशयवान्तरम्[११] ॥ ८६ ॥
तयोरन्तरमानेन चतुर्दिक्षु च लेखयेत्।
अष्टाश्रं हि समारभ्य रन्ध्रभागे तु लक्षयेत् ॥ ८७ ॥
मुखभागस्य तन्मध्ये नालं कुर्यात्सलक्षणम्[१२] ।
यवत्रयान्तरं नालं सूत्रं स्यादुभयोरपि[१३] ॥ ८८ ॥
दृढसूत्राविति ज्ञेयौ सीमायाश्च बहिः स्थितौ[१४] ।

---

१. 81c कन्यावर्तित°] A^1, C^2, G, अन्यावर्तित° A^2 ; 81d घटिकापूजितेन] A, यदिका व्रजते न C^2, घटिकावृ(?)जितेन G.

२. C^2 omet 82b-84a.

३. 82b सूर्चीं] A^1, G, सूत्रं A^2.

४. 83b नवाङ्गारेण वञ्चना] A^1, नवागोवेण वंच च A^2, नवाङ्गारेण पञ्चना G.

५. 83d ज्ञात्वा] A^1, G, कृत्वा A^2.

६. 84b गैरिकाक्तेन] Eds., गौरीकाकेन A^1, G, गौरीकान्तेन A^2, गैरिका तेन C^2.

७. 85a चास्फोटयेन्] A, G, च स्फोटयेन् C^2.

८. 85c लेखान्तरं लक्ष्य] A^1, लेखान्तरं लक्ष्यं A^2, रेखान्तरं लक्ष्य C^2, रेखालखान्तरं लक्ष्य G.

९. 86a lacune A, C^2, G.

१०. 86b अपि] A, C^2, अथ G.

११. 86d अष्टादशयवान्तरम्] A, G, अष्टाङ्गं यवतारकम् C^2.

१२. 88a मुखभागस्य तन्मध्ये] C^2, G, मुखभागस्तनं मध्ये A ; 88b नालं] A, G, नासां C^2.

१३. 88c नालं] C^2, नालः A, नाल° G.

१४. 89a दृढसूत्राविति ज्ञेयौ] Eds., दृष्टसूत्राविति ज्ञेयौ A^1, G, वृष्टसूत्राविति ज्ञेयो A^2, दृढसूत्रमिति ज्ञेयं C^2.

विस्तारं यवमात्रं स्यात्खातं वै तत्प्रमाणतः ॥ ८९ ॥

[४.३.३. प्रथमलक्षणम्]

पूजाभागं त्रिधा कृत्वा द्विभागे लक्षणं भवेत्[१] ।
द्विभागं दशधा कृत्वा मुकुलं चैकभागिकम्[२] ॥ ९० ॥
विस्तारं तत्प्रमाणं स्यादधिकं स्याद्यवद्वयम्[३] ।
क्रमेण कृशतां कृत्वा मुकुलाग्रं तु सन्धयेत्[४] ॥ ९१ ॥
तयोरेव दृढं सूत्रमष्टांशं नालदैर्घ्यकम्[५] ।
मुकुलमूलादारभ्य यावद्बिन्दुविलक्षितम्[६] ॥ ९२ ॥
तयोः संगमनं कुर्यादुभयोः पार्श्वयोरपि।
बिन्दोरेतद्गतं सूत्रं यावत्पृष्ठान्तगोचरम्[७] ॥ ९३ ॥
दृढसूत्राविमौ ज्ञेयौ मणिरेखाविति स्मृतौ[८] ।
प्रथमं लक्षणं प्रोक्तं द्वितीयं लक्षणं शृणु॥ ९४ ॥

[४.३.४. द्वितीयलक्षणम्]

पूजाभागसमस्तं तु भज्य षोडशधा पुनः[९] ।
अधोभागद्वयं त्यक्त्वा चोर्ध्वे चत्वारि संत्यजेत्[१०] ॥ ९५ ॥
मुकुलं चैकभागं स्यान्नवकं नालमेव च।
सव्यापसव्यसूत्रौ तु पूर्ववल्लेखयेद्बुधः[११] ॥ ९६ ॥

[४.३.५. तृतीयलक्षणम्]

पूजाभागसमस्तं तु भज्य द्वादशधा पुनः[१२] ।
ऊर्ध्वे भागत्रयं त्यक्त्वा भागमेकमधस्त्यजेत्॥ ९७ ॥

---

१. 90b द्विभागे] A, G, विभागे C^2.

२. 90c द्विभागं] A, G, विभागं C^2.

३. 91b °द्यवद्वयम्] C^2, °द्यवस्थितम् A^1, °द्वियवस्थितम् A^2, G.

४. 91c कृशतां कृत्वा] A, शताङ्गत्वान् C^2 ; 91d सन्धयेत्] A, बन्धयेत् C^2, G.

५. 92b नालदैर्घ्यकम्] C^2, G, नालदैर्घिकम् A.

६. 92c मुकुलमूलादारभ्य] A^2, G, मुकुलस्य मूलादारभ्य (*v.f.*) A^1, मुकुलं मूलमावभ्य C^2 ; 92d बिन्दुविलक्षितम्] Eds. (d'après *Ajita*), वद्बिन्दुलक्षितम् A, C^2, G.

७. 93c °रेतद्गतं] C^2, °र्ये तद्गतं A.

८. 94a दृढसूत्राविमौ ज्ञेयौ] Eds., दृढसूत्रविमे ज्ञेयं A, G, दृढसूत्रादिमं ज्ञेया C^2 ; 94b मणिरेखाविति स्मृतौ] A, G, मणिरेखा इति स्मृता C^2.

९. 95b षोडशधा] A, G, षोडश वा C^2.

१०. 95c अधोभागद्वयं] A, G, अधो भागे यवं C^2 ; 95d चोर्ध्वे] A, G, ऊर्ध्वे C^2.

११. 96c सव्यापसव्यसूत्रौ] A^1, G, सव्यापसव्यौ सूत्रौ A^2, सव्यापसव्यसूत्रं C^2.

१२. 97b द्वादशधा] A, द्वादधा C^2, द्वनिशया G.

मुकुलं चैकभागं स्यान्नालं सप्तांशमेव तु।
मणिरेखाद्वये कार्ये पूर्वोक्तविधिना सह[१] ॥ ९८ ॥
तृतीयं लक्षणं प्रोक्तं चतुर्थं लक्षणं शृणु।

[४.३.६. तुरीयलक्षणम्]

पूजाभागं त्रिधा कृत्वा एकैकं तु त्रिधा भवेत्॥ ९९ ॥
ऊर्ध्वभागद्वयं कृत्वा भागमेकमधस्त्यजेत्[२] ।
शेषं तु पूर्ववत्कार्यं सर्वशास्त्रविशारदैः[३] ॥ १०० ॥

[४.३.७. मुकुलाकारः (?)]

पद्माभं मुकुलाभं वा खड्गाकारं त्रिकोणकम्[४] ।
करिनेत्रोपमं कार्यं करपुटाकृतिं तु वा[५] ॥ १०१ ॥
छत्राकारं त्रिशूलाभं लिङ्गाकारमथापि वा।
दृढसूत्रं समालिख्य धनुसूत्रं प्रमार्जयेत्॥ १०२ ॥

[४.३.८. सूत्रलेखनम्]

नालं वै रुद्रदैवत्यं वामरेखा तु वैष्णवी[६] ।
दक्षिणे ब्रह्मरेखा स्यात्त्रिसूत्रस्याधिदेवताः[७] ॥ १०३ ॥
हेमसूच्या लिखेद्विद्वान्तत्तन्मन्त्रमुदाहरन्[८] ।
आपो राजेति मन्त्रेण नालसूत्रद्वयं लिखेत्॥ १०४ ॥
इदं विष्णुरिति मन्त्रेण विष्णुरेखां समालिखेत्।
ब्रह्मजज्ञानमन्त्रेण ब्रह्मरेखां समालिखेत्॥ १०५ ॥
न कृशा न च विस्तीर्णा न वक्रा न च खण्डिता[९] ।
न निम्ना न समा ऋज्वी सहजा इव संस्थिता[१०] ॥ १०६ ॥

---

१. 98c मणिरेखाद्वये] A, lacune C^2, मणिरेखाः द्वयोः G.

२. 100a ऊर्ध्व°] A, G, ऊर्ध्वे C^2 ; कृत्वा] A, C^2, त्यक्त्वा G.

३. 100c कार्यं] C^2, कुर्यात् A, G.

४. 101b खड्गाकारं] A, G, खड्गाकं C^2.

५. 101c करिनेत्रोपमं कार्यं] A, G, करस्तेषां न तत्रोप++ C^2 ; 101d करपुटाकृतिं] A, करापुटाकृतिस् C^2, करवीराकृतिं G.

६. 103b °रेखा तु वैष्णवी] C^2, °रेखां तु वैष्णवं A^1, G, °रेखा तु वैष्णवं A^2.

७. 103d त्रिसूत्रस्याधिदेवताः] A^2, त्रिसूत्रस्याधिदेवता A^1, G, त्रिसूत्रा स्याददेवता C^2.

८. 104b तत्तन्मन्त्रमुदाहरन्] C^2, तत्तन्मध्यमुदाहृतम् A^1, G, तत्तन्दर्ध्यम् A^2.

९. 106b वक्रा] A^2, G, वक्रां A^1, चक्रान् C^2 ; खण्डिता] A, G, खण्डितान् C^2.

१०. 106c न निम्ना न समा ऋज्वी] A, G, निम्नगा न सहगा ऋत्विक् C^2 ; 106d सहजा इव संस्थिता] A, G, सहसा इति संस्थितः C^2.

[४.३.९. तर्पणम्]

मधुना तर्पयेद्धीमान्मधुवातेति मन्त्रतः[१] ।
घृतं मिमिक्षेति मन्त्रेण तर्पयेद्वै घृतेन तु[२] ॥ १०७ ॥
ततः शय्यां शलाकां च हेमसूचीमथान्यकम्[३] ।
तत्सर्वं शिल्पिने दत्त्वा ततः स्नानं समारभेत्[४] ॥ १०८ ॥

[५. लिङ्गस्नानादिक्रियाः]

[५.१. लिङ्गस्नानम्]

स्नानश्चभ्रे न्यसेत्पीठं यथाविभवशक्तितः[५] ।
हेमं वा रजतं ताम्रं कौशेयं दारुजं तथा[६] ॥ १०९ ॥
तस्मिल्लिङ्गं समारोप्य आचार्यो मूर्तिपैः सह।
नृत्तगेयसमायुक्तं सर्वातोद्यसमन्वितम्॥ ११० ॥
अर्घ्यं दत्वा तु शिरसि स्नाप्य गन्धोदकेन तु[७] ।
सकलीकृत्य मतिमान्पञ्चगव्यकुशोदकैः[८] ॥ १११ ॥
पञ्चब्रह्म समुच्चार्य स्नाप्य लिङ्गं कषायकैः[९] ।
भस्मना चाष्टमृद्भिश्च उदकैः शकृता पुनः[१०] ॥ ११२ ॥
एतान्विन्द्रेति मन्त्रेण शुद्धतोयेन सेचयेत्[११] ।
यवगोधूमचूर्णैश्च हरिद्रातिलचूर्णकैः॥ ११३ ॥
पत्रतोयेन संस्नाप्य पवमानमुदीरयन्।
पाद्यमाचमनं चार्घ्यं वक्त्रमन्त्रेण दापयेत्॥ ११४ ॥

---

१. 107a धीमान्] A, G, रैखां C^2.

२. 107c घृतं मिमिक्षेति (*v.f.*)] A^2, G, घृतमिक्षेति A^1 (cf. *Ajita*), घृतम्मदीक्षित C^2 ; 107d वै घृतेन] A, G, सुघृतेन C^2.

३. 108a शलाकां] A, G, च कालं C^2 ; 108b हेमसूचीमथान्यकम्] A, G, हैमसूच्या तथान्यकम् C^2.

४. 108d स्नानं] A, G, तम्भं C^2 ; समारभेत्] A, C^2, समाचरेत् G.

५. 109a पीठं] A, C^2, पीठे G ; 109b °शक्तितः] A, °विस्तरम् C^2.

६. 109d तथा] A, C^2, तु वा G.

७. 111a शिरसि] A, G, शिरसा C^2.

८. 111c मतिमान्] A, G, तं स्थाप्य C^2.

९. 112b कषायकैः] A, G, क्षयापनैः C^2.

१०. 112c चाष्टमृद्भिश्च] C^2, G, चाष्टपुष्पिश् A^1, अष्टपुष्पैश्च A^2 ; 112d च उदकैः शकृता] A^1, G, उदकैश्च कृता A^2, उद्वर्त्य च कृतं C^2.

११. 113a एतान्विन्द्रेति] Eds. (*Ajita* t. I, p.144), एतोन्विन्द्रेति A, एको रुद्रेति C^2, यत इन्द्रेति G.

चन्दनागरुगन्धैश्च विलिप्य शिवमादरात्[१] ।
पुष्पं दत्वा हृदा मन्त्री दद्याच्छीतारिधूपकम्[२] ॥ ११५ ॥
प्रच्छाद्य वस्त्रयुग्मेन हृदयेन तु मन्त्रतः।
पिण्डिकां स्नापयेदेवमावेष्ट्याहतवस्त्रकैः[३] ॥ ११६ ॥

[५.२. जलाधिवासः]

आरोप्य मूर्तिपैः सार्धं रथे लिङ्गं तु देशिकः।
पिण्डिकां तु समारोप्य प्रवेश्याथ जलाशयम्॥ ११७ ॥
जलमध्ये प्रपां कृत्वा वितानध्वजभूषितम्।
दर्भमालासमायुक्तं पुष्पदामप्रलम्बितम्[४] ॥ ११८ ॥
चतुर्गात्रस्य मध्ये तु प्राक्शिरस्कं तु शाययेत्।
नृत्तगेयसुवाद्यं च सदा कालं समाचरेत्[५] ॥ ११९ ॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वा जलोषितम्[६] ।

[५.३. स्नानं वेष्टनं च]

आरोप्य सुदिने पश्चात्स्नानवेद्युपरि न्यसेत्[७] ॥ १२० ॥
कृत्वा तु पूर्ववच्छुद्धिं पिण्डिकासहितं बुधः।
रक्तवस्त्रेण संवेष्ट्य लिङ्गमामस्तकान्तकम्[८] ॥ १२१ ॥
पीठं च वेष्टयित्वा तु स्यन्दने स्थाप्य देशिकः।

[६. यागमण्डपेऽधिवासः]

आलयं तु परिभ्राम्य नयेन्मण्डपमध्यतः॥ १२२ ॥

[६.१. स्थण्डिलविन्यासः]

पर्यग्निकरणं कृत्वा पुण्याहं तत्र कारयेत्[९] ।
स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शालिभिः[१०] ॥ १२३ ॥

---

१. 115b °दरात्] A^2, C^2, G, °दरान् A^1.

२. 115d °च्छीतारि°] A, C^2, °च्छ्रीदारु° G.

३. 116d °वस्त्रकैः] A, G, °वस्त्रतः C^2.

४. 118d पुष्पदाम°] A^1, पुष्पदामैः A^2, पुष्पमाला° C^2, lacune G.

५. 119c lacune C^2.

६. 120b वा जलोषितम्] A^1, नालोषितम् A^2, जलशोषितम् C^2, lacune G.

७. 120c आरोप्य सुदिने] A^2, C^2, G, आरोप्यासादिते A^1 ; 120d स्नानवेद्युपरि] A^2, G, स्नानं वेद्युपरि A^1, C^2.

८. 121d आमस्तकान्तकम्] A, G, आमस्तकाङ्कितम् C^2.

९. 123b तत्र कारयेत्] A^2, C^2, G, कारयेत् A^1.

१०. 123c वेद्याम्] A, G, विद्वान् C^2 ; 123d अष्टद्रोणैश्च] A, G, अष्टद्रोणेन C^2.

तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि[१] ।
मध्यमे पद्ममालिख्य दलाष्टकसमन्वितम्॥ १२४ ॥
नवशक्तिं तु तत्रैव पूज्य गन्धादिना पुनः[२] ।

[६.२. शयनविन्यासः]

दर्भैश्च संपरिस्तीर्य तिललाजसमन्वितम्[३] ॥ १२५ ॥
पूर्वाग्रमुत्तराग्रं च स्थण्डिलोपरि विन्यसेत्[४] ।
चर्मजं रोमजं चैव मुण्डजं चाण्डजं क्रमात्॥ १२६ ॥
उपर्युपरि विन्यस्य यथा च परिपूरणम्।
उमागायत्रिमन्त्रेण शयनं पूजयेद्बुधः[५] ॥ १२७ ॥
लिङ्गं तु प्राङ्मुखं कृत्वा ब्रह्माङ्गानि कला न्यसेत्।
त्रितत्त्वं विन्यसेत्पश्चात्रितत्त्वं हृदयैरपि[६] ॥ १२८ ॥
मूर्तिवक्त्राणि नेत्राणि विद्याङ्गानि च विन्यसेत्[७] ।
प्राक्शिरस्कमधःसूत्रं शयने शाययेच्छिवम्[८] ॥ १२९ ॥
सद्योमन्त्रेण चावाह्य स्थापयेद्वाममन्त्रतः।
[९]स्वागतं वामदेवेन पाद्यार्घ्यं हृदयेन तु॥ १३० ॥
अघोरेण तु सांनिध्यं संमुखं पुरुषेण तु[१०] ।

[६.३. उपचाराणि]

पाद्यं दत्वा हृदा मन्त्री शिरसाचमनं ददेत्॥ १३१ ॥
पुरुषेण ददेदर्घ्यं पुष्पमीशानमन्त्रतः।
शीतारिधूपमाददात्कवचेन विचक्षणः[११] ॥ १३२ ॥
हविर्निवेदयेत्पश्चाद्धृदयेन तु मन्त्रतः।

---

१. 124a भूष्य] A^2, C^2, भूष्यं A^1, G.

२. 125b पुनः] A^1, बुधैः C^2, बुधः A^2, G.

३. 125c संपरिस्तीर्य] C^2, तं परिस्तीर्य A, G.

४. 126b विन्यसेत्] A, G, न्यसेत् C^2.

५. 127c उमागायत्रि॰] A^2, G, उमायागन्त्र॰ A^1, उमां गायत्रि॰ C^2.

६. 128d हृदयैरपि] A, G, हृदयेन च C^2.

७. 129a मूर्तिवक्त्राणि नेत्राणि] A, G, मूर्ध्निवस्त्राणि नेत्रेण C^2.

८. 129c अधःसूत्रं] A^2, C^2, G, अधःसूक्तं A^1.

९. C^2 omet 130cd-132ab.

१०. 131a सांनिध्यं] A^2, G, सांनिध्य A^1 ; 131b संमुखं] Eds., सुमुखं A, C^2, G.

११. 132c शीतारिधूपमाददात्] A, G, शीतारिधूपकं ददात् C^2.

ताम्बूलं दापयेद्विद्वान्पुरुषेण तु मन्त्रतः[१] ॥ १३३ ॥

[६.४. कौतुकबन्धनम्]

कौतुकं बन्धयेल्लिङ्गे शिरःस्थाने हृदा बुधः।
हैमैर्वा राजतैर्वापि सूत्रैः कार्पासकैरपि[२] ॥ १३४ ॥
मुकुलीपद्ममुद्रां च दर्शयेत्पञ्चवक्त्रिकाम्[३] ।

[६.५. लिङ्गपीठयोः पौर्विकादिस्थापनभेदाः]

पिण्डिकामधिवसेन्मूले शयनस्योपरि क्रमात्॥ १३५ ॥
पौर्विका पौनःपुन्यं च सहजा च त्रिधा स्मृताः[४] ।
[५]उपलिङ्गवशात्पीठं पूर्वमेव तु कल्पितम्॥ १३६ ॥
तत्पौर्विकमिति ज्ञेयं सन्ततं सहजं स्मृतम्।
पूर्वकाले तु संस्थाप्य लिङ्गं पिण्डिकया सह॥ १३७ ॥
वैकल्पनेन या पश्चाद्योजिता पौन्यका स्मृता[६] ।
गेहे चाधिवसेत्पौर्वे लिङ्गेन सहजेन सह[७] ॥ १३८ ॥
मण्डपेऽधिवसेत्पौन्यं त्रिधा चैवाधिवासनम्[८] ।

[६.६. पीठाधिवासः]

कौशेयास्तरणं पूर्वं वस्त्रेणास्तरणं तथा[९] ॥ १३९ ॥
नवशक्तिसमोपेतं पूजयित्वा यथाविधि।
पीठं चाधिवसेच्छुद्धस्नानं कृत्वा यथाविधि[१०] ॥ १४० ॥
गौरीबीजं समुच्चार्य गन्धपुष्पादिभिर्यजेत्।
रक्तवस्त्रेण संवेष्ट्य लिङ्गमुद्रां प्रदर्शयेत्[११] ॥ १४१ ॥

---

१. 133d तु मन्त्रतः] A, G, समन्वितम् C^2.

२. 134d कार्पासकैर्] A, G, कार्पासजैर् C^2.

३. 135a मुकुली°] C^2, मुकुलं A, G ; 135b पञ्चवक्त्रिकाम्] A, पञ्चवक्त्रकाम् C^2, पञ्चवर्तिकाः G.

४. 136a पौनःपुन्यं च] C^2, पौनपुण्ट्र्या A^1, पौनः पुन्याश्च A^2, G ; 136b सहजा] A^1, G, सहर्म्यं C^2 ; स्मृताः] A^2, स्मृता A^1, C^2, G.

५. C^2 omet 136cd-137cd.

६. 138b योजिता] C^2, ख्यातिता A, चोतिता G.

७. 138c पौर्वे] G, पौन्या A^1, पौण्य A^2, पौन्यं C^2 ; 138d सहजेन सह] (*v.f.*) A^2, सहजैः सह A^1, सहजो जस C^2, सहजं सह G.

८. 139a ऽधिवसेत्पौन्यं] A^2, C^2, ऽधिवसेत् A^1, ऽधिवसेत्सौन्यं G.

९. 139c कौशेयास्तरणं] C^2, G, कुशायास्तरणं A^1 corr., lacune A^2.

१०. 140d यथाविधि] A, G, समन्वितम् C^2.

११. 141d प्रदर्शयेत्] A, G, परिस्तरेत् C^2.

पादाधारशिला चैव नन्द्यावर्तशिलापि वा[१] ।
पिण्डिकां विन्यसेत्पश्चात्पूज्य ब्रह्म हृदा बुधः[२] ॥ १४२ ॥

[६.७. शिवकुम्भस्थापनम्]

शिरःप्रदेशे लिङ्गस्य शिवकुम्भं च विन्यसेत्।
ससूत्रं सापिधानं च सकूर्चं वस्त्रवेष्टितम्॥ १४३ ॥
पूरितः स्याच्चतुर्विंशत्प्रस्थतोयैः सुगन्धिभिः[३] ।
शिवकुम्भमिदं प्रोक्तं सरत्नं साधिदैवतम्[४] ॥ १४४ ॥
कुम्भमध्ये न्यसेद्बीजं प्रासादाख्यं च गन्धितम्।
[५]कूटं भान्तं च यान्तं च मान्तमौकारसंयुतम्[६] ॥ १४५ ॥
बिन्दुनादसमायुक्तं शिवमन्त्रमिति स्मृतम्[७] ।
[८]क्षकारं पृथिवी ज्ञेया मकारो वारुणः स्मृतः[९] ॥ १४६ ॥
रेफश्चैवानलो ज्ञेयो यकारोऽनिल उच्यते[१०] ।
व्योम औकारमेवं स्यात्पञ्चभूताक्षरं परम्[११] ॥ १४७ ॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः[१२] ।
पञ्चभूताधिदैवत्यं भुक्तिमुक्तिफलप्रदम्॥ १४८ ॥
कालाग्न्यादिशिवान्तं स्यान्मन्त्रैः सर्वं व्यवस्थितम्[१३] ।
ज्ञात्वा तु सर्वगं बीजं छेदयेत्पशुपाशकम्॥ १४९ ॥
ध्यात्वा सदाशिवं रूपं पञ्चमूर्तिभिरन्वितम्।

---

१. 142a पादाधारशिला] A^2, C^2, G, पादारश्च शिला A^1.

२. 142d पूज्य ब्रह्म] A^2, C^2, G, पूज्यं ब्रह्मं A^1.

३. 144a पूरितः स्याच्] C^2, पूर्य तस्याच् A, पूर्य तस्यां G.

४. 144d सरत्नं साधिदैवतम्] A, G, रक्तं साराथदैवतम् C^2.

५. 20.145cd-146ab = 1.15ab-15cd.

६. 145c भान्तं] A^1, G, भूतं A.

७. 146b इति स्मृतम्] A, C^2, इहोच्यते G.

८. 20.146cd-148cd = 1.16cd-1.18cd.

९. 146c ज्ञेया] C^2, ज्ञेयं A ; 146d मकारो वारुणः स्मृतः] C^2, वकारं वरुणं स्मृतम् A, वकारं वारुणं स्मृतं G.

१०. 147a चैवानलो] A^2, C^2, G, चैवारलो A^1 ; 147b ऽनिल] C^2, ऽनिलम् A, G.

११. 147c व्योम औकारम्] Eds. (cf.1.17c), व्योम चौकारम् A, व्योमकौकार C^2.

१२. 148b च सदाशिवः] G, शिव एव च A^1, C^2, सदाशिव एव च A^2.

१३. 149a शिवान्तं] A^2, C^2, शिखान्तंA^1 ; 149b मन्त्रैः] C^2, मन्त्रे A, G.

[1]दिव्याम्बरधरं देवं दिव्याभरणभूषितम्[2] ॥ १५० ॥
शुद्धस्फटिकसंकाशं कुन्देन्दुधवलप्रभम्।
कुण्डलैः कर्णगैर्हारैर्यज्ञसूत्रविभूषितम्[3] ॥ १५१ ॥
शूलं परशुवज्रं च खड्गाभयं च दक्षिणे[4] ।
पाशाङ्कुशं च वह्निं च खेटकं वरदं परे[5] ॥ १५२ ॥
कुम्भे ध्यात्वा विशेषेण पद्ममुद्रां प्रदर्शयेत्।
आवाहनादिकं सर्वं पूर्वोक्तविधिना कुरु[6] ॥ १५३ ॥
शिवमन्त्रं समुच्चार्य गन्धपुष्पादिनार्चयेत्।

[६.८. वर्धनीस्थापनम्]

[7]वर्धनीं विन्यसेद्धामे द्रोणतोयप्रपूरिताम्[8] ॥ १५४ ॥
सकूर्चां सापिधानां च सवस्त्रां हेमसंयुताम्।
[9]कान्तान्तं यान्तसंयुक्तं औकारस्वरसंयुतम्[10] ॥ १५५ ॥
[11]बिन्दुनादसमायुक्तं वर्धनीमध्यमे न्यसेत्[12] ।
ध्यात्वा गणाम्बिकां देवीं पीनोन्नतपयोधराम्[13] ॥ १५६ ॥
श्यामाभां द्विभुजां शान्तां सर्वाभरणभूषिताम्।
दुकूलवसनां देवीं ध्यात्वा वर्धनीमध्यमे[14] ॥ १५७ ॥
उमागायत्रिमन्त्रेण गन्धपुष्पादिनार्चयेत्[15] ।

---

१. C^2 et G ajoutent avant 150 cd : पञ्चवक्त्रसमायुक्तं दशहस्तोपशोभितम्।

२. 150d दिव्याभरणभूषितम्] C^2, दिव्यगन्धविभूषितम् A, G.

३. 151c कर्णगैर्हारैर्] A^1, G, कर्णैर्हारैर् A^2, कर्णिकैर्हारैर् C^2.

४. 152a शूलं] A^1, C^2, G, मूलम् A^2 ; 152b खड्गाभयं च] A^2, खड्गभायं च A^1, खड्गं चाभायC^2, खण्डाभयं च G.

५. 152d वरदं परे] A, वरदाभये C^2, परमं परे G.

६. 153c सर्वं] A, G, पूर्वं C^2.

७. C^2 répète 154cd-156a après 163ab (2ème version, cf. note ad 158cd).

८. 154d द्रोणतोयप्रपूरिताम्] A^1, द्रोणतोयैः प्रपूरितम् C^2, द्रोणतोयेन पूरिताम् G.

९. 20.155ab-20.155c = 1.23ab-23c.

१०. 155c कान्तान्तं] C^2, घान्तान्तं A, G ; 155d औकार॰ C^2, G, औंकार॰ A^1, मौकार॰ A^2.

११. C^2 répètera les vers 156b-163ab entre 173a et 173cd.

१२. 156b वर्धनी] A^1, वर्धनीं A^2, C^2, G.

१३. 156d पीनोन्नत॰] A, G, समुन्नत॰ C^2.

१४. 157c दुकूलवसनां] A, C^2, दुकूलवर्धनां G.

१५. 158a उमागायत्रि॰] A, G, महागायत्रि॰ C^2.

[१६]दर्शयेल्लिङ्गमुद्रां च नमस्कारं मनोरथम्[१] ॥ १५८ ॥

[६.९. विद्येशादिकुम्भस्थापनम्]

अभितः कलशानष्टौ द्रोणार्धोदकपूरितान्।
अष्टविद्येश्वरैर्युक्तान्सकूर्चान्सापिधानकान्॥ १५९ ॥
सवस्त्रान्पल्लवैर्युक्तान्स्थापयेत्साधिदैवतान्[२] ।
हेमशूलसमायुक्तान्हेमकूटसमायुतान्[३] ॥ १६० ॥
स्वनामाद्यक्षरं बीजं बिन्दुनादसमन्वितम्।
घटयोर्मध्यमे न्यस्त्वा तत्तन्मूर्तीश्च भावयेत्॥ १६१ ॥
त्रिनेत्रान् चतुर्भुजान्देवान् जटामकुटधारिणः[४] ।
अनन्तादिशिखण्ड्यन्तानष्टविद्येश्वरान्न्यसेत्[५] ॥ १६२ ॥
तत्तन्मन्त्रं समुच्चार्य गन्धपुष्पादिना यजेत्[६] ।
उपवेद्युपरि न्यस्त्वा लोकपालाधिदैवतान्॥ १६३ ॥
कलशान्लक्षणोपेतान्हेमवस्त्रसमन्वितान्[७] ।
ससूत्रान्सापिधानांश्च सकूर्चान्वारिपूरितान्॥ १६४ ॥
तत्तन्मन्त्रं समुच्चार्य पूजयित्वा यथाविधि।
अष्टमङ्गलरूपाणि उपवेद्युपरि न्यसेत्॥ १६५ ॥
पूजयित्वा यथान्यायं तोरणादिघटान्न्यसेत्[८] ।
द्वारकुम्भं तथा स्थाप्य द्वारं द्वारं प्रति द्वयम्[९] ॥ १६६ ॥
नन्द्यादिपशुपत्यन्तं तत्तत्कुम्भे तु योजयेत्[१०] ।

---

१६. C^2 répètera 158cd-163ab après 163ab.

१. 158d मनोरथम्] A, G, lacune C^2, मनोरमम् C^2 (dans les vers redoublés après 163ab), मनोरमाम् C^2 (vers répétés après 172cd).

२. 160a युक्तान्] A^2, C^2, G, युक्ता A^1.

३. 160c °युक्तान्] A, C^2, °युक्तं G ; 160d °युतान्] A, C^2, °युतम् G.

४. 162a त्रिनेत्रान् चतुर्भुजान्देवान्] (*v.f.*) A^2, C^2, त्रिनेत्रां चतुर्भुजां देवां A^1, त्रिणेत्रंश्चतुर्भुजान्देवान् G ; 162b जटामकुटधारिणः] A^2, C^2, G, जटामकुटधारिणीम् A^1.

५. 162c °शिखण्ड्यन्तान्] A^2, C^2 (vers redoublés), G, °शिखण्ड्यन्तम् C^2.

६. 163b यजेत्] A^1, C^2 (vers redoublés), ऽर्चयेत् C^2 ; C^2 reprend après 163ab les vers 158cd-163ab puis les vers 154cd-156a.

७. 164b हेमवस्त्र°] A, C^2, हेमसूत्र° G.

८. 166b तोरणादिघटान्] Eds., तोरणादिग्गजान् A^1, तोरणे दिग्गजान् A^2, lacune C^2, तोरणं दिग्गजान् G.

९. 166c द्वारकुम्भं तथा] A, G, द्वारकूटं ततः C^2 ; 166d द्वारं द्वारं] A, G, द्वाराद्वारं C^2.

१०. 167a °पशुपत्यन्तं] A, G, °पशुपत्यन्तन्तं C^2 ; 167b तत्तत्कुम्भे तु] A^1, तत्तत्कुम्भेषु

[६.१०. अध्ययनादि]

कुर्यादध्ययनं दिक्षु जपेन्मन्त्रं विदिक्षु वै॥ १६७ ॥
ऋग्वेदं दिशि पूर्वस्यां यजुर्वेदं तु दक्षिणे[१] ।
साममुत्तरदेशे तु पश्चिमेऽथर्वमेव च[२] ॥ १६८ ॥
प्रासादमीशकोणे तु अघोरं वह्निगोचरे।
नैर्ऋत्यां मृत्युबीजं तु उमाबीजं तु वायवे[३] ॥ १६९ ॥

[६.११. अग्निकार्यः]

आचार्यो मूर्तिपैः सार्धं होमं कुर्याद्विशेषतः।

[६.११.१. होमद्रव्याणि]

समिदाज्यचरुं लाजान्सक्तुसिद्धार्थमाषकान्[४] ॥ १७० ॥
यवनीवारश्रीपत्रतिलास्त्वेकादशा इमे।
अश्वत्थोदुम्बरप्लक्षवटं पूर्वादिदिक्षु च[५] ॥ १७१ ॥
शमीखादिरश्रीवृक्षमयूराश्च विदिक्षु च[६] ।
पलाशं तु प्रधानस्य सर्वेषामिध्ममुच्यते[७] ॥ १७२ ॥
स्वदिक्स्था मूर्तिपाः सर्वे सर्वशम्बरसंयुताः[८] ।

[६.११.२. शिवाग्निजननम्]

शिवाग्निं जनयेत्पूर्वं आचार्यो विधिना सह॥ १७३ ॥
सोष्णीषश्चोत्तरीयश्च दिव्यगन्धानुलेपनः।
कुण्डं तु शोधयेत्पूर्वं क्षालनं तदनन्तरम्॥ १७४ ॥
तृतीयं शोषणं कृत्वा चतुर्थं पचनं भवेत्[९] ।
उल्लेखनं पुरास्त्रेण वर्मणाभ्युक्षणं स्मृतम्[१०] ॥ १७५ ॥

A^2, G, तत्कुम्भेषु C^2.

१. 168a पूर्वस्यां] G, पूर्वायां A, C^2.

२. 168c साममुत्तरदेशे तु] C^2, G, सामवेदमुत्तरे देशे (*v.f.*) A.

३. 169c मृत्युबीजं] A^1, G, अमृतं बीजं (*v.f.*) A^2, वह्निबीजं तु C^2.

४. 170d सक्तु°] A^2, G, सक्थु° A^1, C^2.

५. 171d °वटं] A, G, °वटाः C^2.

६. 172a °खादिर°] A, G, °खदिर° C^2 ; 172b °मयूराश्] A, C^2, °मधूकाश् G.

७. 172c प्रधानस्य] A, G, प्रधानं स्यात् C^2.

८. 173b °शम्बर°] Eds., °संभार° A, C^2, G.

९. 175b पचनं] A^1, G, वचनं A^2, पवनं C^2.

१०. 175d वर्मणाभ्युक्षणं] A, G, कवचाभ्युक्षणं C^2.

रेखाश्च प्राङ्मुखास्तिस्रो ब्राह्मरौद्राख्यवैष्णवाः[१] ।
उत्तराभिमुखा ह्येका सा शिवा तु न संशयः ॥ १७६ ॥
गन्धपुष्पाक्षतैः पूज्य शिवाग्निं जनयेद्गुरुः[२] ।
मथित्वा वह्निमादाय श्रोत्रियागारजं तु वा॥ १७७ ॥
शरावे ताम्रपात्रे वा निक्षिप्याग्निं परिग्रहेत्[३] ।
अस्त्रमन्त्रेण संशोध्य कवचेनावकुण्ठयेत्॥ १७८ ॥
बीजमुख्येन मन्त्रेण अमृतीकरणं कुरु।
अग्निबीजेन चाभ्यर्च्य गन्धपुष्पादिभिः क्रमात्॥ १७९ ॥
विष्टरं कुण्डमध्ये तु हृदयेन प्रकल्पयेत्[४] ।
स्थाप्य वागीश्वरीं तत्र ऋतुस्नातां विशेषतः॥ १८० ॥
भ्रामयेत्तु त्रिधा चाग्निं योनिमार्गेण निक्षिपेत्।

[६.११.३. अग्नेः गर्भाधानादिसंस्कारः]

संस्थाप्य सद्यमन्त्रेण प्रशान्तेति त्रिधा स्मरन्[५] ॥ १८१ ॥
गर्भाधानमिदं प्रोक्तं ततः पुंसवनं शृणु[६] ।
वामदेवेन शिरसा गन्धैरभ्यर्च्य देशिकः[७] ॥ १८२ ॥
भवेत्पुंसवनं ह्येतत्सीमन्तं तु ततः शृणु[८] ।
पुष्पं दद्याद्विशेषेण शिरसा बहुरूपिणा[९] ॥ १८३ ॥
[१०]वक्त्रेण वर्मयुक्तेन अर्घ्यं दद्यात्सुजातकम्[११] ।
ईशानं नेत्रयुक्तेन धूपदीपं प्रदापयेत्॥ १८४ ॥
नामकर्म इति प्रोक्तं पञ्चसंस्कारमुच्यते।

---

१. 176a रेखाश्च प्राङ्मुखास्तिस्रो] G, पूर्वं मुखस्तिस्रोऽरेखा A, C^2.

२. 177a °पुष्पाक्षतैः] A, G, °पुष्पाकृतैः C^2.

३. 178a शरावे] A^2, C^2, G, शरावा A^1.

४. 180a विष्टरं] A^2, C^2, G, विष्ठरं A^1.

५. 181d प्रशान्तेति] A^1, प्रशान्ते A^2, प्रशान्तेन C^2, G.

६. 182b शृणु] A^2, C^2, G, कुरु A^1.

७. 182c शिरसा] A, G, शिखया C^2.

८. 183a एतत्] A, G, एवं C^2.

९. 183d बहुरूपिणा] C^2, G, बहुरूपिणः A.

१०. C^2 : lacune 184a-184cd.

११. 184a वर्मयुक्तेन] Eds., वर्मयत्नेन A, वामयुक्तेन C^2, G ; 184b सुजातकम्] Eds. (voir 33*.23a), सुशान्तकम् A, G.

[६.११.४. अग्नेः पञ्चसंस्कारादि]

पाद्यमाचमनं चार्घ्यं गन्धपुष्पं च धूपकम्॥ १८५ ॥
हृदयेनैव मन्त्रेण दद्यात्सर्वं विशेषतः।
शिवाग्नेरग्निमादाय अग्निकुण्डेषु योजयेत्[१] ॥ १८६ ॥
प्रागग्रैरुदगग्रैश्च कुण्डं दर्भैः परिस्तरेत्।
आज्यस्थालीं प्रणीतां च प्रोक्षणीं समिधः कुशान्[२] ॥ १८७ ॥
स्रुक्स्रुवौ च चरुस्थालीं द्वन्द्वरूपेण साधयेत्।
प्रोक्षणीपात्रमादाय पूरयेदुदकेन तु॥ १८८ ॥
तिरः पवित्रेणापूर्य कुशाग्रं तत्र निक्षिपेत्[३] ।
पात्रान्संप्रोक्षयेत्तूष्णीमुत्तानानि च सर्वशः॥ १८९ ॥
[४]ब्रह्माणं दक्षिणे स्थाप्य कूर्चं तत्रैव निक्षिपेत्[५] ।
विष्णुं वै वामतः स्थाप्य प्रणीतां तत्र निक्षिपेत्॥ १९० ॥
पूर्वपश्चिमकुण्डे तु उत्तराभिमुखः स्थितः[६] ।
अन्येषु प्राङ्मुखो भूत्वा होमं कुर्याद्विशेषतः॥ १९१ ॥
आज्यशुद्धिं ततः कृत्वा पर्यग्निं प्लवनादिभिः[७] ।
स्रुचः संस्कारमेवं तु स्रुवसंस्कारमेव च[८] ॥ १९२ ॥
तिस्रः परिधयः स्थाप्य पश्चिमे दक्षिणोत्तरे।
अग्नीशानदिशि स्थाप्यावाघारसमिधावुभौ[९] ॥ १९३ ॥
अदितेनुमन्यस्व मन्त्रेण परिषेचनमारभेत्[१०] ।
आघारमाज्यभागं च विदिक्षु जुहुयाद्बुधः॥ १९४ ॥

---

१. 186d अग्निकुण्डेषु योजयेत्] A, G, lacune C^1, अग्निकुण्डे विनिक्षिपेत् C^2.

२. 187c आज्यस्थालीं] A, C, कुण्डस्थलीं G.

३. 189b कुशाग्रं] A^2, C, G, कुशाश्मं A^1.

४. C^1 omet 190ab.

५. C^2 lacune.

६. 191b उत्तराभिमुखः स्थितः] A^1, G, उत्तरभिमुखस्थितः A^2, उत्तराभिमुखस्थितौ C.

७. 192a आज्यशुद्धिं] A^1, C, G, कुण्डशुद्धिं A^2.

८. 192c स्रुचः संस्कारम्] A^1, स्रुवसंस्कारम् A^2, C, G ; 192d स्रुवसंस्कारम्] A^1, स्रुक्संस्कारम् A^2, C^1, स्रुक्च संस्कारम् C^2, स्रुचः संस्कारम् G.

९. 193c अग्नीशानदिशि स्थाप्यौ] C, अग्निरीशानदिक्स्थाप्यम् A^1, अग्निमीशानदिक्स्थाप्य A^2, अग्निरीशानदिक्स्थाप्य G ; 193d आघार॰] A, G, आवघोर॰ C.

१०. 194a अदितेनुमन्यस्व मन्त्रेण] A, C^2, lacune C^1, अदितेन्विति मन्त्रेण G.

पुरुषाघोरसद्यैश्च वामेन जुहुयाद्दिशि[१] ।
ईशानं मध्यतो हुत्वा वह्निबीजं दशं हुनेत्[२] ॥ १९५ ॥
क्षुरिकेणोद्घाटयेद्वक्त्रमन्त्रेणैव तु निष्कृतिः[३] ।
शिवाग्निजनितो ह्येवं पश्चान्निक्षिप्य विष्टरम्[४] ॥ १९६ ॥
आवाहनादि यत्कर्म पूर्वोक्तविधिना सह[५] ।
शिवाग्नौ शिवमावाह्य पञ्चावरणसंयुतम्॥ १९७ ॥

[६.११.५. अष्टमूर्त्यादिकुण्डानि]

भवश्च पूर्वदिग्भागे आग्नेय्यामुग्र एव च[६] ।
शर्वश्च दक्षिणे कुण्डे वामस्तु नैर्ऋते ततः[७] ॥ १९८ ॥
रुद्रश्च पश्चिमे भागे भीमो वै वायुगोचरे।
पशुपतिश्चोत्तरे कुण्डे ऐशान्यामीश एव च[८] ॥ १९९ ॥
त्रिणेत्राश्चतुर्भुजाश्चैव जटामकुटधारिणः।
कुण्डमध्ये न्यसेद्देवान् तद्बाह्ये च वसवः स्थिताः[९] ॥ २०० ॥
तद्बाह्ये मरुतश्चैव लोकपालाश्च तद्बहिः[१०] ।
लोकपालविहीनः स्यान्मध्यमे होमकर्मणि[११] ॥ २०१ ॥
मरुतो वसवो हीनाः कन्यसे होमकर्मणि।
कुण्डाधिदेवताः सर्वा विन्यसेत्कुण्डमध्यमे[१२] ॥ २०२ ॥
पाद्यादिदीपपर्यन्तमर्चयेत्तु विधानतः।

---

१. 195a पुरुषाघोरसद्यैश्च] C^2, तत्पुरुषाघोरसद्यैश् A, G, पुरुषाघो सद्यैश्च C^1.

२. 195d दशं] A^2, C, G, दशनं A^1.

३. 196b वक्त्रमन्त्रेणैव] A^1, C, वक्त्रमस्त्रेणैव A^2, G.

४. 196c विष्टरम्] A^2, C, G, विष्ठरम् A^1.

५. 197b सह] A, कुरु C, G.

६. 198b उग्र] C^1, A^2, उग्रम् A^1, G, अग्र C^2.

७. 198d वामस्तु नैर्ऋते ततः] A^1, वामदेवस्तु नैऋते A^2, C^1, G, वामदेवस्तु नैऋ C^2.

८. 199c पशुपतिश्] (*v.f.*) A, C^1, G, पाशुपश् C^2.

९. 200c °द्देवान्] A^2, C, °देतांस् A^1, G ; 200d वसवः स्थिताः] G, व्यवस्थिताः A, वसवस्तथा C.

१०. 201a मरुतश्] A, C^1, G, वसवश् C^2.

११. 201c लोकपालविहीनः स्यान्] A^1, लोकपाला विहिना स्युर् C^2, D^1, लोकपालविहीनं स्यान् A^2, G, +++लाविहीना स्युर् C^1, लोकपाल विहीना स्युर् D^2.

१२. 202c कुण्डाधिदेवताः सर्वा] G, कुण्डाधिदेवताः सर्वे A, कुण्डाश्च देवताः सर्वा C, कुण्डदेवताः सर्वा D, .

[६.११.६. नानाभेदाहुतयः]

शिवमन्त्रं समुच्चार्य शिवाग्नौ जुहुयाच्छतम्[१] ॥ २०३ ॥
अन्येषां देवतानां च तत्तन्मन्त्रैर्दशाहुतिः[२] ।
ब्रह्माङ्गैश्च ततो हुत्वा प्रत्येकं तु शताहुतिः[३] ॥ २०४ ॥
त्रियम्बकेन मन्त्रेण समिधाहुतिमाचरेत्।
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा॥ २०५ ॥
शतमष्टोत्तरं वापि प्रत्येकं जुहुयात्क्रमात्।
आज्यं हुत्वा हृदा मन्त्री पूर्वसंख्याक्रमेण तु॥ २०६ ॥
[४]घृतं मिमिक्षेति मन्त्रेण जुहुयात्सङ्ख्यया घृतम्[५] ।
चरुं हुत्वा तु सद्योन देवस्यत्वा चरुं हुनेत्[६] ॥ २०७ ॥
शिरसा तु लाजं हुत्वा एषामीशेति मन्त्रतः[७] ।
सक्तुं वामेन मन्त्रेण आपो राजेति मन्त्रतः[८] ॥ २०८ ॥
सिद्धार्थं शिखया हुत्वा यो रुद्रस्तदनन्तरम्[९] ।
माषं हुत्वा तु घोरेण एष ते रुद्र मन्त्रतः[१०] ॥ २०९ ॥
कवचेन यवं हुत्वा त्र्यम्बकेनैव मन्त्रतः[११] ।
नीवारं पुरुषेणैव आप्यायस्वेति मन्त्रतः॥ २१० ॥

---

१. 203d शिवाग्नौ] A, C, G, शिवाग्नेन D.

२. 204b दशाहुतिः] A, C^2, दशाहुतिम् C^1, D.

३. 204d शताहुतिः] A, D^1, lacune C^1, दशाहुतिः C^2, G.

४. D^2 omet 207b-208c.

५. 207a घृतं मिमिक्षेति] (*v.f.*) A^2, G, घृतमिक्षेति A^1, C, D ; 207b जुहुयात्सङ्ख्यया] G, जुहुयात्तत्सङ्ख्ययां A, D^1, हुत्वा तत्सङ्ख्यया C.

६. 207c सद्योन] Eds., सङ्ख्येन A, दैवत्यं C, lacune D^1, संवेन G ; 207d देवस्यत्वा चरुं] A, D^1, G, ध्यात्वा चैव चरुं C^1, ध्यत्वा चैव चकं C^2.

७. 208a तु लाजं हुत्वा] Eds ., लाजं हुत्वा (*v.f.*) A^2, C, D^1, G, लाजहुत्वेन A^1 ; 208b एषामीशेति] A, D^1, G, येषामीशेति C.

८. 208c सक्तुं वामेन] A^2, G, सक्थुं वामेन A^1, सक्तुं वामेति C, सक्तुवोमेति D^1 ; 208d आपो राजेति] A^1, C, D, G, आपोहिष्ठेति A^2.

९. 209a सिद्धार्थं शिखया] A^1, सिद्धार्तान्शिखया A^2, G, +++न शिवया C^1, सिद्धीयान्शिवया C^2, सिद्धार्थान्शिवया D.

१०. 209c तु घोरेण] A, G, ह्यघोरेण C, भ्यघोरेण D^1, D^2(?) ; 209d एषते रुद्र मन्त्रतः] A^1, D, G, एषने रुद्रमन्त्रतः A^2, lacune C^1, एषामीशेति मन्त्रतः C^2.

११. 210b मन्त्रतः] A, G, होमयेत् C, D.

अस्त्रेण जुहुयात्पत्रमप्सु मे सोम इत्यपि[१] ।
तिलान्हुत्वैशमन्त्रेण यतयत्तेति मन्त्रतः[२] ॥ २११ ॥
द्रव्यान्ते व्याहृतिं हुत्वा स्पृशेल्लिङ्गस्य मस्तकम्[३] ।
तदन्ते होमयेद्धीमान्गौरीं ब्रह्माङ्गविद्यया[४] ॥ २१२ ॥
गौरीगायत्रीमन्त्रेण गौरीमिमायेति मन्त्रतः[५] ।
हुत्वा हुत्वा स्पृशेत्पीठं पञ्चविंशतिसंख्यया॥ २१३ ॥
ब्रह्मजज्ञानमन्त्रेण हुत्वा ब्रह्मशिलां स्पृशेत्।
गर्भगेहस्य तन्मध्ये वास्तुहोमं समाचरेत्॥ २१४ ॥
पुण्याहं वाचयित्वा तु दद्यादर्घ्यं विशेषतः।
एकरात्रं द्विरात्रं वा त्रिरात्रं वाधिवासयेत्॥ २१५ ॥
एवं जागरणं रात्रौ नृत्तगेयसमन्वितम्।

[७. लिङ्गस्थापनम्]

[७.१. दक्षिणा]

आचार्यो मूर्तिपैः सार्धं स्नानं कृत्वा विशेषतः॥ २१६ ॥
न्यासं कृत्वा यथान्यायं सोष्णीषः सोत्तरीयकः[६] ।
पञ्चाङ्गभूषणैर्युक्तो वस्त्राङ्गुलिविभूषितः॥ २१७ ॥
हैमिकैर्यज्ञसूत्रैश्च हैमिकैः कटिसूत्रकैः[७] ।
अधमं विंशनिष्कं स्याद्द्विगुणं मध्यमं भवेत्[८] ॥ २१८ ॥
उत्तमं त्रिगुणं प्रोक्तमाचार्यस्य तु दक्षिणा।
पिण्डिकास्थापकस्यार्धं अष्टांशं मूर्तिपस्य तु[९] ॥ २१९ ॥

---

१. 211a पत्रमप्सु] C^1(etc.), पात्रमप्सु A ; 211b सोम इत्यपि] A, G, सोमो ब्रवीदिति C, D^1, सोमो ब्रवीमितिः D^2.

२. 211c हुत्वैश°] A^1, D, G, lacune C^1, हुनेद्धून्° C^2 ; 211d यतयत्तेति] A^1, lacune A^2, यत्तोयमिति C, G, यत्नेयमिति D^1, यत्तेयमिति D^2. Lire यदस्येति ? (cf. ci-dessous 262d).

३. 212a द्रव्यान्ते] A, C, G, द्रव्याहुतिं D ; 212b लिङ्गस्य मस्तकम्] A, G, लिङ्गं समस्तकम् C^1, D, लिङ्गं सुमस्तकम् C^2.

४. 212d °विद्यया] A^1, C, D, G, °वृद्धया A^2.

५. 213b गौरीमिमायेति] (*v.f.*) A, G, गौरीमिमेति C, D.

६. 217a यथान्यायं] A, C, D, यथान्यासं G ; 217b सोष्णीषः सोत्तरीयकः] A^2, C^2, G, सोष्णीषं सोत्तरीयकम् A^1, D, सोष्णीषकम् C^1.

७. 218b हैमिकैः कटिसूत्रकैः] A, G, हैमिकैः पङ्कजैस्ततः C, D.

८. 218c विंशनिष्कं] A^1, विंशति निष्कं A^2, C, D, G.

९. 219d अष्टांशं] A, C, G, अष्टांशैर् D.

द्विगुणं वास्तुहोमस्य अर्धमध्ययनस्य तु[१] ।
दैवज्ञस्य तथैव स्याद्भक्तानामस्त्रजापिनाम्[२] ॥ २२० ॥
भक्तानां परिचाराणां यथाश्रद्धा तु दक्षिणा[३] ।

[७.२. गर्भगृहे लिङ्गस्थाननिर्देशः]

गत्वा तु मूर्तिपैः सार्धं प्रासादं शिल्पिभिः सह[४] ॥ २२१ ॥
[५]शिवाम्भसा तु संप्रोक्ष्य गर्भगेहं विचक्षणः।
गोमयालेपनं कृत्वा पुण्याहं तत्र कारयेत्॥ २२२ ॥
ब्रह्मसूत्रं पुरा कृत्वा देशिकः शिल्पिभिः सह।
यमसूत्रं पुनः कृत्वा मत्स्यद्वयवशाद्बुधः॥ २२३ ॥
तत्तत्सूत्रं न्यसेद्भित्तौ दक्षिणोत्तरपृष्ठतः[६] ।
शालिपिष्टमयं वापि गैरिकामयमेव वा॥ २२४ ॥
भित्त्यभावे विना सूत्रं प्रत्यग्रे तु महानल[७] ।
यष्टिमास्थापयेत्तत्र तन्मध्ये सूत्रमानयेत्॥ २२५ ॥
एवं सुनिश्चितं सूत्रं ब्रह्माख्यं च यमाख्यकम्।
एकविंशतिभागेन विभजेद्द्वारविस्तृतम्[८] ॥ २२६ ॥
दशांशं दक्षिणे त्यक्त्वा न्यस्त्वा वै चोत्तरे तथा।
भजेत्षडंशमध्यांशं दक्षिणे चतुरं त्यजेत्॥ २२७ ॥
द्वितीयमुत्तरे त्यक्त्वा सूत्रमास्फालयेच्छनैः[९] ।
पृष्ठतो ब्रह्मसूत्रं तु तन्मानं चोत्तरे न्यसेत्[१०] ॥ २२८ ॥

---

१. 220b अर्धमध्ययनस्य] A^1, तदर्धं मध्यमस्य A^2, C, तदर्धमध्यधनस्य D^1, तदर्धं मध्ययनस्य D^2, G.

२. 220d भक्तानामस्त्रजापिनाम्] G, भक्तानामस्त्रं जापिनाम् A^1, ++++न्त्र जापिनाम् C^1, C^2 तस्यार्द्धं चास्त्रजपिनाम् D^1, तस्यार्धं चास्त्रजापिनाम् D^2.

३. 221a परिचाराणां] A^2, C, D, G, परिवाराणं A^1 ; 221b °श्रद्धा] A, D^2, G, °शुद्धा C, D^1.

४. 221d प्रासादं] A^2, C, D, G, प्रासाद° A^1.

५. C^2 omet 222ab-223ab.

६. 224a तत्तत्सूत्रं] C, D, तत्र सूत्रं A.

